deluxe

Bharat

Long Book

Name

Subject

Year

BPU

BHARAT PAPER UDYOG
CHAWRI BAZAR DELHI-110006
PHONE 266729

deluxe

Bharat

Long Book

Name

Subject

Year

BHARAT PAPER UDYOG
CHAWRI BAZAR DELHI-110006
PHONE 266729


TH
A




TH
A

~~श्रीहरिः शरणम्~~ वृन्दावनतः

परमादरणीयेषु विद्वत्प्रवरेषु, अनुकरणीय- 12/9/93

चरणेषु गुरुचरणेषु रचितोऽयमञ्जलिर्भवदनुग्रहभाजा

रामकृपालत्रिपाठिना।

भवत्कृपया सकुशलं समयं यापनञ्च भवन्तमपि तथैव कामये। इच्छन्नपि बहोः कालाद् दर्शनं न आरब्धं भवताम्। श्रीरामकीर्तिमहाकाव्यविषये मया किञ्चित् लिखितं आसीत्। तत्तु अधवाशयो वैव कुर्वन् भवत्सकाशं नेतुं नाधारयम्। सम्प्रति इदं प्रेष्यते तूष्णीकृत्यानुग्रभाजनं मे विधास्यन्ति तत्र भवन्तो भवन्तः।

मातृचरणेषु प्रणामाः निवेदनीयाः। ~~अन्ये~~ अन्ये नमो मातृजनायेभ्यः च। शिशुभ्यः स्नेहः।

भवतां स्नेहभाजनम्

—डो. रामकृपालत्रिपाठी

इंगलक्षी का. सं. मन्दिर

वृन्दावनम्

श्रीहरिः शरणम्

इदं हि काव्यं श्रीरामकीर्तिमहाकाव्य' मिति व्यपदिश्यं, भारतेवर्षेऽङ्गुलि-गण्येषु विद्वत्सु प्रथमगण्यानां, स्वकीर्तिकौमुदीज्वालितपञ्चाशत्सूर्यागानां, गीर्वाणवाणीतीर्थाधिमन्दराचलानां, नैकनिबन्धग्रन्थरत्ननिरचन प्रकाशनभरितभारतीभाण्डागाराणांमू, आजीवनं लेखनाद्यापनव्यापृतानां, वन्द्यभवतां भवतां श्रीचारुदेवशास्त्रिणां,- पुण्यफलभूतानां रत्नानां पुत्रः स्वगुरोरेव गुरोरधिगतप्राथमिकशिक्षाणां, बाल्यकालादेव प्रकाशित स्वकवित्व प्रतिभाविशेषाणां, चीमतामतल्व स्नातककक्षायामधिगत-सर्वतोऽधिकाङ्कानां पञ्चालविश्वविद्यालयादुत्तीर्णेऽमलं कक्षाणां तत्रापि लब्ध प्रथमश्रेणीनां, ततश्च श्रीमत्सहिन्दु विश्वविद्यालयात् महतापरिश्रमेण शोधग्रन्थरत्नं प्रणीय परिलब्धं "विद्यावारिधि" इत्युपाधीनां, नैकभाषापण्डितानां, संस्कृताङ्गलथाईभाषासु प्राप्तानितरसाधारणपाटवानां कविताकामिनीनां कौमुदीकान्तकलाधराणां दिल्लीविश्वविद्यालये सबलङ्कृतसंस्कृतविभागाध्यक्षपदानां, विभूषितकलासंकायाध्यक्षपदानां, चक्रे च सनाथीकृत पुरीस्थ श्रीजगन्नाथसंस्कृतविश्वविद्यालयकुलपति पदानां नकेवलं स्वदेशे किन्तु-

"विद्वत्वञ्च नृपत्वञ्च नैवतुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥" इति सूक्तिं चरितार्थयतां भारतदेशस्य बैंकाकनगरे शिल्पाकर-विश्वविद्यालये संस्कृतविभागेऽलङ्कृताभ्यागताचार्यपदवीनां यूरोपद्वयमहाद्वीपस्य सप्तविंशतिविश्वविद्यालयेषु व्याख्यात-व्याख्यानानां नकेवलं यूरोपेऽपितु दक्षिण-अमेरिका: दक्षिण-पूर्व-एशिया' आदिमहाद्वीपेषु नैकदेशेषु स्वज्ञानज्योतिः प्रज्वालयतां स्वनामधन्यानां गुरुज्ञानगौरवेण सार्थकीकृत-गुरुपदवीनां पदवाक्यप्रमाणपारावारपारीणानां च विद्वन्मानस-हंसानां विमलधियां सुधियां श्रीसत्यव्रतशास्त्रिणां पुण्यजी-वृतं यशश्चैव काव्यरूपेण राजते।

एभिर्महात्मभिः प्रणीतेषु ग्रन्थरत्नमालायामिदङ्काव्यरत्नं तरलगुटिकायते। येषां स्फिलतेरकी नकेवल काव्यरचनायां प्रवाहमती समालोचनायामपि तथैव पाटवमस्ति विद्यते। यच्चकवित्वं किमपि नूतनमेव स्वरूपमुद्वहति,-

काव्यमिदं

तत्तु स्वयमेवाचीटय, निमलविद्यावदातमानसा मानसा इव राजहंसा विद्वांसः स्वयं विभावयिष्यन्ति। आवाल्मीकि कवीनां स्ववाग्धारा प्लुताभिः, विविधगुणग्रथिताभिः वाङ्मणिभिर्निर्मिता हारावलयः वाग्देवतायाः कण्ठमुभूषयन् मुषयन्ति चानिन्दु कतमत् काव्यं सर्वातिशायिशोभाव्यापकमिति नाद्यापि विबुधाः निर्णेतुं प्रभवन्ति। किन्त्वस्य महाकाव्यस्य कृते 'उत्तररामचरितं'स्थो भवभूतिरेव प्रमाणम्-

म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि!
कर्णामृतानि मनसश्च रसायनानि।

त्वरितमनारतं च संस्त्रियमाणे काले चक्रे यत्र सम्प्रति गैर्वाण्या, अतिशोचनीयावस्था सम्जाता तत्राविर्भवत्सप्तसन्धिरिव श्रीरामकीर्तिमहाकाव्यम् जगतां विदुषामाशाः प्रकाशदानेन सम्जीवयति। ननु पूर्वमेव लिखितानि रामकथामाश्रित्य संख्याकानि काव्यानि कथं नाद्यानानि चेति किमनेनाप्रेक्षेणेन सूतजेनेति चेन्न, भारते प्रथितास्यः कथाभ्यो विलक्षणकथावस्तुनोऽत्रानिरूपणात् पारम्परिकरामकथापात्रेभ्योऽत्यन्तोत्कताहेतुकचरित्रवत्पात्राणामत्र संनिवेशात् कस्यचिन्नवीनस्यैव मार्गस्यात्र प्रकाशितत्वाच्च। काव्यमिदमधीयानानां चेतस्सु सुतरां तरतमभावः जागर्ति पूर्वश्रीरामकथामाश्रित्य निबद्धानां काव्यानामपेक्षया।

पुराणमित्येव नसाधु सर्वम्:-

श्रीरामकीर्तिमहाकाव्यं काव्यक्षेत्रे कमपि नवीनं पन्थानं पाठकानामध्येतॄणां श्रोतॄणाञ्च पुरः प्रदर्शयति। महाकाव्यानां लक्षणमनुसृत्यापि प्रणेता मक्षिकास्थाने मक्षिकेति सिद्धान्तस्य पक्षे न पतति। तथाहि विश्वनाथो दर्पणे षष्ठपरिच्छेदे-

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः॥
सद्वंशः क्षत्रियोवापि धीरोदात्तगुणान्वितः।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा॥
शृंगारवीरशान्तानामेकोऽङ्गी रस इष्यते।

अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ॥
इतिहासोद्भवं वृत्तमन्यद् वा सज्जनाश्रयम् ।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत् ॥
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ॥
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ।
नातिह्रस्वा नातिदीर्घा सर्गा अष्टाधिकाइह ॥
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ॥
संध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ।
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः ॥
संयोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ।
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ॥
वर्णनीया यथायोगं सांगोपांगा अमी इह ।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ॥
नामास्य, सर्गोपादेयकथया सर्गनामतु ॥

इति महाकाव्यलक्षणं चकार । इदं अपि श्रद्दधानाः कविवृषभाः श्रीसत्यव्रताः तात्स्थ्यक्रोडीकृत्य मिति क्षीरं तोयं नास्वादयन्ति । प्रायः कवयः निष्ठयाकवित्वचातुरीं प्रदर्शयितुकामाः वनपर्वतसंध्यादिवर्णनपराः एव दृश्यन्ते येन पाठकः कथारसमेव नास्वादयितुं पारयति । एकस्य खलानां निन्दां "कथापि खलु पापानामलमश्रेयसेयतः" इति माघोऽपि परिहरन् लक्षणस्येमं मर्शं निरस्यति । यथा कस्यचित् दोषवर्णनं सज्जनगर्हितं तथैव गुणवर्णनमपि महात्मानः परिहरन्ति रागद्वेषुकत्वादिति । एतादृशेऽवंशे तु प्रकृतं महाकाव्यमपि सर्वथा दासीत्वमेव दधाति । यद्यपि थाई भाषायां निबद्धा रामकथा उत्सन्निता तथापि कविना स्वोपज्ञामपि बहु संगृहीताम् । रामायणीकथा यद्यपि भारतभूरेवास्ति किन्तु थाइलेण्डदेशीयैर्जनैः रामकथां थाई देशभूमिकामेव मन्यते । इदमपि तत्त्वं रामकीर्ति महाकाव्यस्य प्रथमसर्गे इत्थं प्रकाशितम् ।

मङ्कुटाख्यस्तत्परोऽन्यो[१] नृपालसत्तमः
स्वबुद्ध्या रामगाथां यो व्याख्यत् ख्यातो मनीषिषु ॥ रामकीर्तिमहाकाव्यम्
1/24

याइदेश्यास्ततः पूर्वं नैवाजानन् मनागपि ।
रामायणस्य कर्त्तासीद् वाल्मीकिर्मुनिपुङ्गवः ॥
स एव नृपतिः कृत्या स्वया तान् प्रत्यबूबुधत् ।
यदस्या दिव्यगाथाया भारतेऽवतरन्मुदमवः ॥ राम० 1/28-29

साम्प्रतं शिक्षितालोकाइदं जानन्त्यसंशयम् ।
अशिक्षिताः पुनर्नैवं बुद्ध्यन्ते स्वमते स्थिताः ॥ तदेव 30

अत्र तेषामाकूतम्—

जनौ रामस्य सीतायाश्चात्रैवाजन्यसंशयम् ।
रामरावणयोर्युद्धमत्रैव समजायत ॥ तदेव 31
अयोद्ध्याऽभिधा नगरी देशेऽत्राद्यापि राजते ।
सञ्जीवनी यतो नीता सोऽद्रिरत्रैव दृश्यते ॥ " 32
लवस्य रामपुत्रस्य नाम स्वात्मनि बिभ्रती ।
पुरी लोपबुरी चापि देशेऽत्रैव विराजते ॥ " 33
शरेण राममुक्तेन सञ्जाता हरिता शिला ।
मद्ये पुरि स्थिता यत्र रामं स्मारयते ऽनिशम् ॥ " 34
इत्येवं प्राकृता लोका गतानुगतिका इह ।
रामगाथां दृढं याइदेशीयामेव मन्वते ॥ " 35

इति। अत्रमान्यतायामपि रामायणकथां प्रति तेषामनुरागातिशय एवकारणम्। तैः स्वकीयेन दृढतरेणात्मीयभावेन बहून्यन्यानि कथानकानि संयोजितानि, येन कथायाः किञ्चिदन्यदिव स्वरूपं परिलक्ष्यते। मूलकथासु न स्वरूपं जहाति। नवेष्वेवकथानकेषु मेदो जागर्ति। तदेतत् सर्वं विचक्षणाः स्वयमेव रामकीर्तिमहाकाव्यानुसन्धानेन ज्ञास्यन्ति—

स्फुटं भवेत्तावदनेन विश्ववर्ण्यवैशिष्ट्यमिहास्तियद्वा
जनीनमन्यास्ति विचारणीयं रामायणे रामकथाभिधेये ॥
राम० 1/39

---

१ - बुक्कनाइलर्तनामकात् नृपतेः परः, यः नाट्यरूपेण रामगाथां लिलेख।

भारतीय रामायणकथातरथाई देशीयकथायां के चिद् विशेषाः-

1- भारतीय रामकथासु श्रीरामः सूर्यवंशीयः प्रसिद्धः, अस्मिन्नेववंशे विवस्वान्मनुरिक्ष्वाकुःस्वार्यति र्नाभागोम्बरीषोयुवनाश्वोमान्धाता सगरः-असमञ्जसोऽशुमादिलीपोभगीरथः खट्वाङ्गो रघुरजो दशरथः इत्यादयो नृपा संबभूवुः। ततश्चक्षुश्रयात् श्रीरामोऽजनि किन्तु थाइदेशीयरामायणेऽन्यथैवेयं कथोपवर्णिता। हतहिरन्यक्षो नारायणो यदा निजालयं जगाम तदा तत्र पद्मेशयानशिशुमेकं ददर्श। ऋषभेवाग्रेऽनोमतन्तिति नामा पृथिव्याः प्रथमो भूपोबभूव। तस्यैव पुत्रः श्रीदशरथः ततश्च श्रीरामः।

2- रामोत्पत्तिकथा रामकीर्तिमहाकाव्ये रामायणकथामेवसंवदति तत्रस्वल्पीयानेवभेदः यथा-
कृष्णशुक्लस्य मुनेः रामकीर्तिमहाकाव्ये कलैकोटिनाम्नावर्णितम् कलैकोटिऋषेः ईश्वरं प्रतिगमनं तत्प्रेरणयाचेश्वरस्य नारायणावतारवाहनम्। ईश्वरप्रार्थितस्य नारायणस्य दशरथापत्यत्वापत्तेः स्वीकृतिः।
रामायणे(भारतीये) श्रीरामभरतौ श्यामवर्णौ लक्ष्मण-शत्रुघ्नौ च गौरवर्णौ वर्णितौ। अत्राच रामकीर्तिमहाकाव्ये श्रीरामः हरितवर्णः, श्रीभरतो रक्तवर्णः श्रीलक्ष्मणः पीतवर्णः श्रीशत्रुघ्नश्चास्तमिना संवलितः समुद्भूतः।

3- रावणजन्मनोनिषधेऽत्यन्तप्रकृतकाव्ये सुतरां भेदः।
भारतीयकथासु रावणकुम्भकर्णौ भगवतो नारायणस्य द्वारपालचरावुपवर्णितौ। तावेव मुनिशापात् स्वर्णहिरण्यकशिपुहिरण्याक्षौ ततश्चापरजन्मनि रावणकुम्भकर्णौ। रामकीर्तिमहाकाव्ये तु रावणः—

अस्त्यत्पुरानन्दवनाख्यकोऽसौ
कैलासशैलेकिल देवयोनिः
महेश्वरं द्रष्टुमुपागतानां
प्रक्षालयन् पादयुगंसुराणाम् ॥
ससेनकत्वेननियुक्तएवं विनोदभाङ्निर्जरसांबभूव।
उपाहसंस्तेसमुपेयिवांसस्तं शीर्षकेशोद्धरणप्रमेण॥

राम-५/५-६

स एव कुम्भो तरङ्गैर्व्यंतरन् क्रमेणतटमाप्तः। तत्र च
वने तपस्यता च मिथिलाधिपेनासादितः, कस्मिंश्चित्तरु-
मूले गतं स्वमित्वागो पायितश्च।

एवं क्रमेण वृद्धिंगतकेशोऽसौ निःशेषकेशो बभूवेति खिन्नः महेश्वरात् "यमेवाकृत्याविनिर्दिशेयंस परासुः पतेदि"ति वरं लेभे। तस्मात् च भीतैः दैवैः प्रार्थितेन नारायणेन छद्मना घातितः। तेनैव च दत्तवरो जननान्तरे विंशतिबाहुको दशाननो जातः।

५- एवञ्च चतुर्थे सर्गे सीता जन्मोपाख्यानं वैचित्र्यमादधाति। कलैकोटि समनुष्ठितयज्ञकुण्डात् एकोदिव्यः पुरुषश्चतुरोऽन्नपिण्डान् करे कृत्वा प्रकटीबभूव। तस्मिन्नेव समये तत्र लङ्कायां तेषां पिण्डानां गन्धमाघ्राय मन्दोदर्यां रावणपत्न्यां अशनाया समुत्पन्ना। तस्यास्तामिच्छामवलोक्य रावणः कालनामिधानां काञ्चिद्दसुरयोषितं तानानेतुमादिदेश। सा चायोध्यां समाप्त्य काकरूपं समाधृत्य पिण्डानामर्धभागमाच्छिद्य लङ्कां निर्गत्य। तान्निशिट्वा मन्दोदरी सगर्भा बभूव—

तान्निशिट्वा बभूवा अन्तर्वत्नी मन्दोदरी तदा।
क्रमेण सुषुवे चापि कन्यामेकां विलक्षणाम्॥ राम. ५/२७

इयञ्च रावणकुलनाशहेतुरिति कृत्वा—

विभीषणो वटे न्यस्य तत्कन्यामाह चक्रिणम्।
तद्गृह्यतां घटोऽयंमोः! सत्वरं हिप्या॥मिति॥
राम. ५/३२

इयमेवकन्याचे क्रमेण सीतात्वेन ख्याति इतेति महतावैचित्र्येन कविना संग्रथितम्।

यदा चिरायापि न तानि शेकुः,
कुम्भंसमासादयितुं तदानीम्।
हलं नृपालः स्वयमेव धृत्वा,
समुद्यतो भूमि विकर्षणेऽभूत्॥

तत्कालमेव प्रकटो बभूव
तन्मध्य आसीच्च विलोभनीया।
अदृश्यतासी पङ्कज पत्र पक्ष्मं
दिव्य स्वरूपा खलु कन्यकेका॥ राम. ५/५५-५६

यतोऽभवल्लाङ्गलकृष्टभूमेः सीतासमुद्भवोऽस्या अतएव नाम।
सीतेति तस्याऽभवत् पितेति ख्यातश्च पृथ्व्यां जनकोऽभूव॥

रामo ५/५२

5- एवञ्च सीतामुद्वाह्याऽयोध्यां गच्छन्तं श्रीरामं मध्ये-मार्गं श्रीपरशुरामो मिलितः। श्रीरामेणेशं धनुर्दर्वस्तामिति परशुरामोऽतीव क्रुद्ध आसीत्। किन्तु रोषमयवचनैरेव स विवादः शान्तिगतः युद्धं विनैव। इति रामायणीकथा वा रामकीर्तिमहाकाव्ये किञ्चिद्विशेषेणोपवर्णिता।—

अत्र परशुरामो रामासुरत्वेन व्यपदिष्टः। स च श्रीरामेण परशुं दधानो घोरं युद्धमयुध्यत।

रामेण रामासुरनामकोऽसौ ➡ भुवि प्रसिद्धं परशुं दधानः।
पराजितः शस्त्रभृतां वरेण प्रदर्शितश्चापि निजस्वरूपम्॥

ततश्च पराजितेन रामासुरेण महेशं धनुः रामाय प्रदत्तम्। यत् किल महेशेन पुरा रामासुरपितामहाय त्रिमेधसे दत्तमासीत्। रामश्चेदं धनुः स्वीकृत्य वरुणस्य न्यासीकर्तुरेव चिक्षेपेति सूत्कण्ठावर्धिनीकथा।

6- भारतीयरामायणकथासु यत्र वाणी प्रयुक्ता कुब्जामन्थरा कैकेयीं वरयाचनाय प्रेरयन्ती वर्णिता तत्र रामकीर्तिमहाकाव्ये, श्रीरामे सा स्वयमेव द्वेषं दधाना तत्कार्यं करोति

कुब्जाभिधाना परिचारिकासीत्
प्रियामृशं कैकयराजपुत्र्याः।
द्वेष्यस्य मां रघुनन्दनेऽपि या
न्याचाद्धृदि प्राक् चरितापमानात्॥

रामo ५/२

कदाचित् रामस्तस्याः कुब्जपृष्ठेन तद्विलेपनप्रकटनाम्यामकीं कृतिं कोपहेतुरासीत्। यतस्तां कुब्जामवलोक्य सर्वे पार्श्वस्थाजना तामुपहसितुं प्रवृत्ता आसन्।—

सर्वेऽपि पार्श्वस्थ जना अनेनदृश्येनतावद्धसितुं प्रवृत्ताः
अहो! जनानामुपहासपात्रं रामेण नीतास्म्यहमित्यमत्त॥

रामo ५/५

एवञ्च - पूर्वापकार प्रति शोचनाय,
दन्दह्यमाना हृदयेन कुब्जा ।
मत्वोपपुक्तावसरं जगाम,
सा सत्वरं कैकयराज पुत्रीम् ।। राम० ६/१

गत्वा च सा कैकेयीमुद्दीपयाञ्चकार ।
अस्मिन्नेव पञ्चमे सर्गे जिह्वोपाख्यानेनातीव निगूढाकथा कविना स्फोरिता ।

7- षष्ठे सर्गे सीताहरणप्रसङ्गे जटायुषो वधप्रकारेऽपि रामायणकर्मणा सह संवदति । बहु निषुद्धयापि दशाननो यदा जटायुषं हन्तुमशक्नोत्, तदा जटायुः स्वयमेव स्वमरणसाधनमुवाच -

तवासिना वा निशितेन वाहं
शस्त्रेण वान्येन कथञ्चनापि ।
हन्तुं न लोकत्रितयेऽपिशक्य-
स्तथाविधा मे खलु शक्तिरस्ति ॥
माहेश्वरं केवलमङ्गुलीयं
सीताकुलिप्रत्ययमादधानम् ।
शक्नोति मां हन्तुमतो वृथा ते
शस्त्राणि वास्त्राणि च मुञ्चकुब्जे ॥

श्रुत्वादरस्तीयं वचनं स्मयोक्तं
क्षणात्प्रसुप्तोत्थितवद्दृशास्यः ।
सीताकुलेर्द्वागपकृष्य चूर्तं -
स्तदङ्गुलीयं प्रजहार तस्मात् ।
राम० ६/३०-३२

एवमङ्गुलीयकप्रहरणात्सो हतः । इति विचित्रं कथानकमुद्भावितम् ।

8- अत्राजटायुषोऽन्त्येष्टिं श्रीरामः हस्तस्पर्शविनैवकेवलं शरेणैव समपादयत् । एकेनबाणेन चितायाः ज्वलनमपरेण च मृद्धदेहस्य चितायामारोपणं तृतीयेन वह्नेः शमनमिति वर्णनं कथायाः अनिर्वचनीयमेव सकुतुकं भेदमापादयति ।

8- इह रामकीर्ति महाकाव्ये मारुति मिलन प्रसङ्गेऽपि भेदेनवर्णितः सर्गे। आदिकाव्ये वाल्मीकीये तदन्यथैव दृश्यते। तत्र — सीतान्वेषणपरौ रामलक्ष्मणौ पम्या सरोवरात् ऋष्यमूकजामानं पर्वतमनुसरतः। तस्मिन् पर्वते बालिभीतः सुग्रीवः ससहायो निवसति। सराघवौ दृष्ट्वा भीतो भवति —

तावृष्यमूकस्य समीपचारी
चरन्ददर्शाद्भुतदर्शनीयौ।
शाखामृगाणामधिपस्तरस्वी
वितत्रसे नैव निचेष्टचेष्टाम्॥

वा० म॥।।२४

तथाभूतः सुग्रीवो हनुमन्तं वानिमानिति भूतार्थज्ञानाय प्रेषयति —

तौ त्वया प्राकृतेनेव गत्वाज्ञेयौ प्लवङ्गम।
इङ्गितानां प्रकारैश्च रूपव्यामाषणेन च॥

वा० म।२।२म

इति हनुमत्सम्पर्को पाख्यानमुपवर्णितम्।
रामकीर्ति महाकाव्यमत्रापि विसंवादि कथानकमुद्भावयति — सीतान्वेषणपरो रामः मध्येपथं श्रान्तो भवति। क्वचित् वृक्षातले निषण्णः स निद्राधीनो जायते। श्रीलक्ष्मणस्तं विजयन्नास्ते। अत्रान्तरे कपिप्रवीरेऽञ्जनानन्दनः कुतश्चित् समापतत्। ऊर्ध्वो दृष्टिर्लक्ष्मणस्तन्नालोकयामास। कपिश्च वृक्षशाखां घूर्णयितुमारेभे। श्रीलक्ष्मणेन तर्जितोऽपि नामुष्मात् कार्यात् विरत इति तं दण्डयितुं लक्ष्मणो यावत् धनुः शरञ्च सज्जयति तावदसौ कपिः उमावपि लक्ष्मणहस्तादाच्छिद्य वृक्षशाखामधिरूढोऽति जवेन। लज्जितश्च रामावरजोऽयं जागरयाम्बभूव। सर्ववृत्तञ्चान्यवेदयदिति रामऊर्ध्वदृष्टिर्बभूव।

श्रुत्वा दसीयं वचनं विचित्रं
रामः क्षणादूर्ध्वमवालुलोके।
शाखामृगं चापि ददर्श तत्रा —
भिज्ञांश्चिह्नांस्तस्य च लक्षणानि॥

रामo 7/10

एवं लक्षणैः श्रीरामेण परिज्ञातो हनुमान् वृक्षादवतारः।

ततः स वृक्षादवतीर्य सद्यः
स्तत्पादपद्मग्रहणाभिकाङ्क्षः।
विनीतवत्तस्य पुरः स्थितोऽभूत्
तं चाब्रवीत् स्वं च समर्पयंस्मै॥
रामा० ७/१२

इति वर्णितो हनुमत्संपर्कः।

१- ५०८मे सर्गे दरमी प्रसंगेऽपि नवीनां मञ्जुलाम्च छायां विमर्शति। वाल्मीकीये दुन्दुभिराक्षसो न महिषरूपधारि-णो वालिनो युद्धं वर्णितम्। 'दरमी' 'दुन्दभिः' इत्यनयोर्न कश्चिन्मौलिको भेदः। इदमत्राधिकम्-
भारतीयकथासु वाली मयपुत्रं मायाविनमनुसरन् पर्वत-गुहां प्रविशति। अत्र तु दरमी रादासन् महिषरूपधारिणं इति। अन्यत्तु सुग्रीवाणशिलोच्चयैः गुहापिधानादिकम् तुल्यमेव। पदं खलु वालिवधबीजायते। कथापि बहु-तरी सर्गेऽस्मिन् निबद्धा। प्रायः वालिवधः सीतान्वेषण-प्रक्रियावशात्कस्मिन्काण्डे सर्गे वान्येषु रामायणेषु दृश्यते। लङ्कादहनादिकं हनुमच्चरित्रं पृथगेव वर्णयन्तो मनीषि-णो दृश्यन्ते। किन्त्वत्रे रामकीर्तिमहाकाव्यविधातुः कवेः शक्तिर्यदसौ त्रिष्वेव पर्वसु काण्डमेकं निबद्धवान्। यथा सुग्रीवचम्वाः प्रयाणं हनुमता समुद्रमुल्लङ्घ्य लंकाप्रवेशः सीतादर्शनं पौलस्त्यपुर्या भस्मीकरणञ्च।
तानि चेमानि हृदयावर्जकानि पद्यानि-

सर्वा चमूस्तस्य विशालरूपा
सुग्रीवराजस्य समुद्रमेव।
लङ्कापुरीं जेतुमुपात्तभावा
समुद्रतीरं समभिप्रपन्ना॥

ततोऽनु विज्ञान् हनुमान्ज्जगाम
लङ्कापुरीं तादृदर्श चापि।
सीतामभिज्ञानमुपानयन्सो-
ऽङ्गुलीयकं दाशरथिप्रदत्तम्॥

निवर्तमानश्चततः सलङ्का-
दग्धात् स्वपुच्छाद्दनुजैर्नृशंसैः ।
ददाह हाहाकृतमास्तयेन
स्वाहाकृतञ्चापिसमस्तपुर्याम् ॥
रामा० ४/३३-३५

10- नवमे सर्गे स्वप्नविज्ञानमतिरमणीयशैल्योपन्यस्तम्। आइदेशीयानां सामाजिकसांस्कृतिकमान्यताः प्रायो भारतीयविचारानेव संवदन्ति। अत्र भारतीयसाहित्ये स्वप्नविज्ञानं बहुविचारितं वर्तते। गोविन्दराजाख्येनविदुषा रामायणभूषणे स्वप्नादृष्यापूर्वमेव वर्णनं कृतम्। वाल्मीकीयेऽपि रावणवधसूचक स्वप्नस्य वर्णनमस्ति। ततोऽत्र रामकीर्तीये इत्यानेवनेदोऽस्ति यत्तत्र त्रिजटाकर्तृकं स्वप्नदर्शनमित्तच्च स्वयमेव रावणः पश्यति। स्वप्नस्य प्रकारे तु सुमहान् भेदः वाल्मीकीये। त्रिजटा, राक्षसीः स्वं स्वप्नं प्रावयति -

रावणश्च मयादृष्टो मुण्डस्तैलसमुक्षितः ।
रक्तवासाः पिबन्मत्तः करवीरकृतस्रजः ॥
विमानात् पुष्पकादद्य रावणः पतितः क्षितौ ॥
कृष्यमाणः स्त्रिया मुण्डो दृष्टः कृष्णाम्बरः पुनः ।
पिबंस्तैलं हसन्नृत्यन् भ्रान्तचित्ताकुलेन्द्रियः ॥
रथेन खरयुक्तेन रक्तमाल्यानुलेपनः ।
गर्दभेन ययौ शीघ्रं दक्षिणां दिशमास्थितः ॥
पुनरेवमया दृष्टः रावणो राक्षसेश्वरः ।
पतितोऽवाक् शिराभूमौ गर्दभाद्भयमोहितः ॥
सहसोत्थाय सम्भ्रान्तो मयार्त्तो मदविह्वलः ।
उन्मत्तरूपो दिग्वासा दुर्वाक्यं प्रलपन् बहु ॥
दुर्गन्धं दुःसहं घोरं तिमिरं नरकोपमम् ।
मलपङ्कं प्रविश्याशु मग्नस्तत्रस रावणः ॥
प्रस्थितो दक्षिणामाशां प्रविष्टोऽकर्दमं ह्रदम् ।
कण्ठेबद्ध्वा दशग्रीवं प्रमदा रक्तवासिनी ॥
कालीकर्दमलिप्ताङ्गी दिशंयाम्यां प्रकर्षति ॥
वा० सुन्दर० २७/२२-२९

एवं तत्र मया दृष्टः कुम्भकर्णो महाबलः ।
रावणस्य सुताः सर्वे मुण्डास्तैल समुक्षिताः ॥
वराहेण दशग्रीवः शिशुमारेण चेन्द्रजित् ।
उष्ट्रेण कुम्भकर्णश्च प्रयातो दक्षिणां दिशम् ॥

वा० सु० २७/३०-३१

इति वीभत्स रस संवलितः स्वप्नः वाल्मीकीये वर्णितः रावण कुल नाश सूचकः ।

अत्र तु रामकीर्ति महाकाव्ये स्वप्न वर्णनेऽपि काव्यत्व दर्शनम् । प्रतीकात्मिका शैली च समाश्रिता । यावत् स्वप्नस्य व्याख्यानं न भवति तावत् पाठको न किमपि बुध्यति अतएव विशेषज्ञमुखेनानुपदमेव तत् कार्यं कारितम् । स्वप्नाः शुभाशुभ फलदायिनो भवन्तीति साधु स्पष्टीकृतम् तदेतत् समूर्तिकं स्वप्न वर्णनं मतिमनोहरमिति किञ्चित् प्रदर्श्यते -

हनुमता यद्यपि सुवर्णमयी लङ्का दग्धा श्यामतां प्रतिपन्नासीदिति तत्सौन्दर्यं विलुप्तमिवासीत् । किन्तु रावणः पुनरपि तां दीपयाञ्चक्रे —

अल्पेनैवा सुरपुर पतिः कालखण्डेन लङ्कां
तेजो दीप्तां पुनरिति परं विस्मयं तद्विनेतुं ।
संस्कारोऽस्यै मुहुरपि ददे काम्य कान्तिं प्रभूतां
येनात्यर्थं कनक वलयं तत्प्रवर्णाधिमासे ॥

तथाविधायां तस्यां रावणोऽतीव सुखेनोवास —

लङ्का यस्मादभवदधिकं पूर्वतोऽपि प्रदीप्ता
पूर्णा भोगैरचिरतरकैर्देवलोकेऽपि काम्यैः ।
तेनात्यर्थं सुखमनुभवन् रावणस्तां शशास
देवैर्यक्षैरुरग पतिभिः पूज्यमानोऽसुरैश्च ॥

राम० १/२-३

तथाभूतोऽपि रावणः सीताहरणकृत सुकृतो निशिकदाचित् शयितः स्वप्नमवाप्तवान् —

.... सुप्तोरात्रावयमतिसुखी स्वप्नमेकं ददर्श
कस्याश्चिद्योऽजनय दमितोऽस्यान्यथावृत्ति चेतः

राम० १/५

तस्मिन् स्वप्ने तितुमुलतया युद्ध्यमानौ ददर्श
श्येनावेकोऽमवदिह ययोः कृष्णवर्णस्तथा च
आसीदेकोऽतिचपलसुचिर्येन कृष्णो हतोऽभूत्
प्रत्यग्दिग्भागत उपगतः पूर्वकायाद्गतेन ॥

तत्पश्चात्स स्वकनखगते कोटरे नारिकेले
तैलासेकं विदधतमहो स्वं ददर्शातिमुग्धः ।
वर्तिं तस्मिन् निदधतमसौ स्वं यदा पश्यति द्राग्
योषा तत्रापतति सहसादृष्टपूर्वा कुतश्चित् ॥

वर्तिं सा प्रज्वलयति तदा येन तत् कोटरं द्राग्
दग्धं वह्निः करतलमनु प्राविशच्चापि तस्य ।
सर्वः कायस्तदनु सुतरामन्वसूद्वह्निदाहं
तस्मिन्काले झटितिशयनादुत्थितोऽसूदृगूजः ॥
राम० १/९५-९७

अत्रेदं स्वप्नवर्णनं यथाश्रुतरूपेण पाठकानां चेतःस्वं मीषणत्वन्न तनोति । विमीषण एव रावणानुजस्तत्कार्णं स्व-व्याख्यानेन सम्पादयति । भारतीयाः विनाशसूचकाः स्वप्ना अपि भीषणा भवन्ति । यथा पूर्वपंक्तिष्वत्रादर्शितमेव-

उन्मत्तरूपो दिग्वासा --- इत्यादि । अत्रराम-कीर्तौ ये स्वप्ने श्येनयोर्युद्धं भवेन्नामकिञ्चित् भीकरम्, तत्रापि श्वेतश्येनप्रसङ्गस्तु भयस्थानेवै चित्र्यमेवविपुलयति तदनु नारिकेले तैलासेकः तत्रावर्तिनिधानं स्त्रियाश्चागमनादिकं सर्वमौत्सुक्यवर्धकमेव । आर्षदेशे एतानि लिङ्गानि स्युर्मृत्योरित्यपि सम्भावना कर्तुं शक्यते । प्रणेतृबुद्धिविलासो वेति को जानीते । "अपारे कान्तिसंसारे कविरेवप्रजापतिः
यथास्मैरोचते विश्वंतथेदं प्रतिपद्यते ॥"
इत्येवस्थितिरत्रालब्धास्पदा स्यादिति मन्ये । अन्यथेयमुक्तिः किमुदाहरणास्यात् ।

एतत्सर्वमतीवाद्भुतं कविपटुत्वनिबन्धनञ्च ।
ततश्च स्वप्नव्याख्या श्रवणदग्धकर्णो रावणो विमीषणंगृह्णन्निव कासयतीत्यपरं कथासूत्रमपि सृष्टम् ।

e।। - विभीषणो रावणं परित्यज्य श्रीरामं शरणङ्गतः इति कथानकं सर्वत्र रामकथासु सामान्यम्। रामकीर्तिमहाकाव्येऽपि तथैव। क्वचित्तु चरणप्रहारेण दूयमानो विभीषणः रामं गच्छति क्वचित् परुषवचनश्रवणमात्रेणैव। अत्रापि प्रकृतकाव्ये -

'ज्वाला भ्रातर्निजकरतलं यानुभूतादहन्ती
सैषासाध्वीजनकतनया त्वद्विनाशैकहेतुः।
तां त्वं शान्त्या दशरथसुतं प्राग् विनिर्यातयस्व
रक्षाघो च प्रियमिह कुलं राक्षसानां समस्तम्।
राम०१/१२

इति विभीषणस्य 'सीतां राक्षसकुलरक्षायै ~~रामस्य~~ रामाय समर्पय' इत्याशयकं वाक्यं श्रुत्वा स्वप्नदर्शनदग्धोऽपि क्रोधनन दग्धो रावणः -

वस्तुं सत्यं मयि नितरामर्हसि त्वं विमूढो
निर्गच्छेतास्वयमहमुतत्वामहं शत्रुपक्षम्।
लङ्कापुर्याः पृथगनुचरैः सावमानं करोमि
स्वाङ्गं चेत्स्याद्वपुषि गलितं तद्बहिष्कार्यमेव।
राम० १/१४

इति परुषमुक्त्वा विभीषणं परित्यजति। स च राममासाद्य सुखमासादयति। तदस्मिन् निखिलेऽपि प्रसङ्गे काव्यसौन्दर्यं नक्वचिदपि ह्रीयते। सर्वत्र कवित्वं स्वीयां रसमयीमुपस्थितिमाविष्करोति। अनुपदमेव विभीषणाय शक्तिं दर्शयन्तो वानरा यत् कुर्वन्ति तदनिच्छतोऽपि मे लेखनी लेखितुमुद्यच्छत्यन्नोऽनुच्छि -

तच्छ्रुत्वा ते वचनममलं यूथमुख्यस्य दीप्ताः
शक्तेः स्वस्याः परिचयविधौ स्वं मनोदत्तवन्तः।
वृक्षान्केचित् विपुलतरकान् केचिदेवापि चाद्रीन्
मूलोच्छेदं करतलगतान् चक्रिरे साहसेन॥

अन्ये तावद्दृढतरचियः सूर्यमावृत्रिरे द्राक्
जातं विश्वं प्रबलतमसाच्छादितं येन विश्वम्।

केचिच्चाधो पवनमबलं तेनिरे स्वस्त्यवेगा-
दन्ये चाधो जलधिमतुलं शुष्कतां नीतवन्तः ॥
रामः ५/२५-२६

कपिनिकरशक्तिप्रदर्शनजन्मा तुमुलः कोलाहलः लङ्कागतेन रावणेनापि श्रुतः इत्येतावतैव तेषां शक्तिरनुमीयते। तमेवश्रुत्वा दशाननो दूतं प्रणिधिरूपेण प्रेषयति। तस्मिंश्चा सफलमनोरथे स्वमेव साधुवेशेन रूपयित्वा पौलस्त्यो रामसेनां विवेशालब्धमनोरथश्च विषण्णो न्यवृतत् इति सर्वं नवीनश्चेदयं कथानकमत्रापि प्रकृतकाव्ये निबद्धम्। अस्मिन् नवमे सर्गे नकेवलं कथानकानां वैचित्र्यमेव मोदावहं छन्दसां वैविध्यमपि चतीहरम्। स्मारयति छन्दः मन्दाक्रान्ता कालिदासस्य मेघदूतनामकं रत्नम्। नकेवलं छन्दः स्वरूपमात्रेणानुकरोति मेघम् किन्तु शब्दशुष्कः शैलीरचनापि तथैव — यथा —

नाम्बे वास्से दनुजकुलजो मीषणस्त्वं विशेषात्
यत्सत्यं मे विगतमिवते मीषणत्वं विभाति
यस्त्वं रामं दशरथसुतं वन्यवेषं ब्रवीषि
मृत्युं मे भीस्त्रिभुवनजयस्फीतबाहुद्वयस्य ॥
रामः ५/१२

नकेवलमत्र रावणनिष्ठस्य क्रोधस्याभिव्यक्तिर्भवतिकिन्तु सहैव विभीषणशब्दस्य किमपि नूतनं निर्वचनं विधाय कौतुकाक्रान्तमजायते पाठकस्य चेतः। इति रौद्राद्भुत-रसयोः समकालं मुक्तिः कस्य न मेदावहा।

१२- नवम सर्गे धाइदेशीयां रामकथामनुकुर्वति रामकीर्ति-महाकाव्ये विचित्रमेकं कथानकं प्रस्तावितं वर्तते।
यवनः श्रीरामं समरनिमुखमापादयितुं राक्षसीमेकां वेश्यक-यीनाम्नीं प्रेषयति। सा वेश्यकयी नान्या काचिदपितु विभीषण-सुतैव। सा बहुरूपा रक्षःस्त्री रामशिबिरं निकषा गत्वा स्वात्मानं सीतारूपेऽरूपयित्वा स्वां मृत्तामिव परिदर्शयन्ती तस्यामेव नद्यां निपतिताऽत्र यत्र श्रीरामभद्रोऽनुदिनं स्नान-

मज्जनादिकं व्यतनोत् । अस्मिन् प्रपञ्चे रावणस्यायमभिसन्धि यत्-

..... आलोकयतां मुहूर्तमात्रं भद्रः ॥
राम० ७/३

ततश्च -

जनप्रियो मे किमु जीवितेन
कार्यं ममेति प्रतिपन्नबुद्धिः
विक्रान्तरात्मा विरमेत्स युद्धात्
प्राणांस्त्यजेद्वा वनमाश्रयेद्वा ॥राम०७/५

तस्य दनुजस्य यथानुमानं यदा दाशरथिः स्नानादिकं विधातुं तत्रागतः तदा तटिन्यास्तटे जनकात्मजाया मृतं शरीरं समवालोके, विप्लुतधैर्यश्चबभूव । ततश्च चिरयति तस्मिन् सुग्रीवहनुमन्तौ तमन्वेषयन्तौ तां तटिनीं समागतौ । तत्तत्यं वृत्तमवलोक्य मतिमान् हनुमान् सीतामरणं गत्वैव । अतएव स -

मृतं शरीरं जनकात्मजायाः
अन्यस्त्रियाः वाऽसुरसम्भवायाः ।
एतत्परीक्षार्थमकालहीनं
चितां स सम्प्रज्वलयाम्बभूव ॥
राम०७/१५

तत्तापदग्धा सा सद्यश्चितायां उत्प्लुत्य रक्षोद्रुमेण परिणतातिष्ठत् । ततश्च विभीषणः श्रीरामं व्यजिज्ञपत् 'इयम्मे बेज्जकयीति नाम्नी पुत्री, सा च स्ववधकर्मणि सर्वथा वधमर्हति' इति । रामश्च सर्वं वृत्तं ज्ञात्वा भक्तवत्सलतां मृशं बिभ्रत् -

एवं सखे! नैव भवेत्कदाचित्
हन्यां कथं मित्रवरस्य कन्याम् ।
यथा तवेयं हि तथा ममापि
भ्रमयो मयास्याः प्रथमोऽपराधः ॥
राम०७/२१

इत्युक्त्वा तां सबहुमानं हनुमता लङ्कां प्रेषयामास । हनुमांश्च तया सहैकं विमानमारुह्य यदा लङ्कां प्रति ~~प्रस्थितवान्~~ गच्छति, तदा मध्ये मार्गे अघटितघटना पटीयसी

मज्जनादिकं व्यतनोत् । अस्मिन् प्रपञ्चे रावणस्यायमभिसन्धि
र्यत्-

..... आलोकयतां मुहूर्तं रामभद्रः ॥
राम० ७/३

ततश्च -

नष्टप्रियामे किमु जीवितेन
कार्यं ममेति प्रतिपन्नबुद्धिः
विक्रान्तरात्मा विरमेत्स युद्धात्
प्राणांस्त्यजेद्वा वनमाश्रयेद्वा ॥राम०७/५

तस्य दनुजस्य यथानुमानं यदा दाशरथिः स्नानादिकं विधुं तन्नागतः तदा तटिन्यास्तटे जनकात्मजाया मृतं शरीरं रामवालुलोके, विप्लुतधैर्यश्चबभूव । ततश्चिरयति तस्मिन् सुग्रीवहनुमन्तौ तमन्वेषयन्तौ तां तटिनीं समागतौ । तन्नष्टयं वृत्तमवलोक्य मतिमान् हनुमान् सीतामरणं नष्टयैव । अतएव स -

मृतं शरीरं जनकात्मजायाः
कन्यस्त्रिया वाऽसुरसम्भवायाः ।
एतत्परीक्षार्थमकालहीनं
चितां स सम्प्रज्वलयाम्बभूव ॥
राम०७/१५

तत्तापदग्धा सा सद्यश्चितायां उत्प्लुत्य रक्षोरूपेण परिणताऽतिष्ठत् । ततश्च विभीषणः श्रीरामं व्यज्ञिपत् 'इयम्भे वैरूपकीर्ति नाम्नी पुत्री, सा च स्वाभवकर्मणा सर्वथा वधमर्हति' इति । रामश्च सर्वं वृत्तं ज्ञात्वा भक्तवत्सलतां मृशं बिभ्रत् -

एवं सखे! नैव भवेत्कदाचित्
हन्यां कथं मित्रवरस्य कन्याम् ।
यथा तवेयं हि तथा ममापि
क्षम्यो मयास्याः प्रथमोऽपराधः ॥
राम०७/२१

इत्युक्त्वा तां सबहुमानं हनुमता लङ्कां प्रेषयामास । हनुमांश्च तया सहैकं विमानमास्थाय यदा लङ्कां प्रति प्रस्थितवान्, तदा मध्ये मार्गं अघटितघटना पटीयसी

माया मनसिजस्य महीयसी स्वविलासं कर्तुमारभते।
भारतीये निखिलेऽपि साहित्ये केसरिकिशोरस्यान्जनानन्दनस्य मारुतेः सर्वत्रैव बालब्रह्मचारित्वेन चित्रणमस्ति। अस्मै भगवान् सर्वथाऽष्टविधं मैथुनात् पराङ्मुख एव यापयति जीवनम्। अतएव भारतीयेष्वतिसुदीर्घजीविष्वधिगण्यते। अद्यापि ते महात्मानो मर्त्यांविचरन्ति इति दृढं मन्यते -

"अश्वत्थामा बलिव्यासो हनूमांश्चविभीषणः
कृपः परशुरामश्चसप्तैतेचिरजीविनः।
सप्तैतान् संस्मरेन्नित्यं मार्कण्डेयमथाष्टकम्।
जीवेद्वर्षशतंसोऽपि सर्वव्याधिविवर्जितः॥"

केवलमियमेव जनश्रुतिर्जागर्ति यद लङ्कां दग्ध्वा भीतो मारुतः स्वशरीरतापशान्त्यै स्वात्मानं सागरेन्यक्षिपत्। तदा मत्सीकाचित् तदीयं स्वेदबिन्दुं न्यगिलत्। तेन च सा सगर्भा जाते ति मकरध्वजजामानं पुत्रं सुषुवे। अयमेव महिरावणस्य द्वारप आसीत्। अनेनैव हनुमतो युद्धमभवत्।

यद्यपि रामकीर्ति महाकाव्येऽपि मच्छ्रुतसंज्ञकस्य हनुमत्पुत्रस्य वर्णनमस्ति। यः किल पातालनिवासिनो मैरावाभिधस्य कस्यचित् रावणमित्रस्य रक्षसः सेवकतां बिभर्ति। सोऽपि समुद्रे एव सुवर्णमत्स्यागर्भात् समुत्पन्नः। हनुमद्वीर्यजश्चायं कथानके मकरध्वजवृत्तान्तमेवानुवदति। किन्तु रामकीर्तीये कथानके यो विशेषः स तु नितरां पाठकानां हृदयेषु साश्चर्यं विच्छत्तिविशेषमातनोति। अनादि महात्मनो हनुमतः पुत्रद्वयी वर्णिता। एकस्तनूजः बेज्जकयी गर्भजः द्वितीयश्च सुवर्णमत्स्यासुतः। तत्र बेज्जकयीसङ्गमो पाख्यानं दशमसर्गे वर्णितम् तच्च भारतीयानां कृते आश्चर्यमयमिति मन्ये हनुमच्छ्रुतपूर्वत्वात्। मायायाः शाश्वतिकेऽतिप्रबले प्रपञ्चे सर्वे एव प्राणिनः विबद्धाः इति हनुमतो विलासे काव्यमय्या शैल्या विवृणोति कविः - वृत्तमत्यन्तातीव सुपठं तोटकाभिधम्-

अथ रामवचो हृदये निदधत् कपिराज सबेज्जकयीमनयत्।
पथियानपरश्च बभूव दृढं कुसुमेषुशरैरसमैः प्रहतः॥
राम० १०/२५

यानस्थ एव कपिः तां रक्षः सुन्दरीमभि प्रपश्यन् कामपरो बभूवेति – 'बलवान् इन्द्रियग्रामो विद्वांसमपि कर्षति' ऋच च

जन्वग्निः प्रमदानाम घृतकुम्भसमः पुमान् ।
सुतामपि रहो जह्याद् ह्यन्यदा यावदर्थकृत् ॥

इत्यादि व्यासवचानान्येव प्रमाणीचकार । तदेव च रामकीर्तिकर्त्तानुपदमेव प्रतिपादयति काव्यरूपेण न व्यासवत् केवलं ~~मात्रम्~~ उपदेशरूपेण –

तरुणी कनकं कमलं कमला जहिकस्य हरन्ति मनोहरिणम् ।
जविवेकि जनोऽपि जिवर्तयितुं प्रभवेदिदमित्यमृषोद्यवचः ॥

कुसुमायुधशक्तिरहो ! अमिता हनुमानपि यद्वशमापकृती ।
असुरीमपि स प्रणयं प्रबलः समयाचत तत्सहितो रहसि ॥

रामo 10/25-26

सर्वथा श्रीहनुमान् तरुणीसङ्गं विमुख इति प्रणेता स्वमतम् किं वा भारतीय चिन्तनं 'हनुमानपि यद्वश---' इत्यत्र उपरिलिखिते पदेऽपि ~~जी~~ पदेन प्रत्यपादयत् । अत्र विधिना दर्शितं स्वसामर्थ्यम् । प्रमाणयति चेदमेव तत्वं नैषधीयचरितस्य तृतीयसर्गस्थः श्रीहर्षः –

अवश्यमन्येद्यवनग्रहग्रहा
यथा दिशा धावति वेधसः स्पृहा ।
तृणेन वात्येव तथानुगम्यते
जनस्य चित्तेन वृशावशात्मना ॥

अन्यत्रापि च नीतिवचनेषु विद्वांसः –

पुष्पं दृष्ट्वा फलं दृष्ट्वा, दृष्ट्वा चनवयौवनाम् ।
एकान्ते कान्चनं दृष्ट्वा कस्य नोच्चलते मनः ॥

इत्यादिभिः तमेवार्थं साधयन्ति । वशिनः पुनरेषां कामपरवशत्वं यथाश्चर्यकरं तथा स्त्रियास्तथा मृतत्वन्न । तस्याः कृतेतु तत् सामान्यम् । इदमेव रहस्यमस्फोटयत् रामकीर्तिमहाकाव्ये श्री शास्त्रिमहाभागः –

यदि याति लता स्वयमेवतरुम्
यदि याति नदी च तथाजलधिम् ।

यानस्थ एव कपिः तां रक्षः सुन्दरीमभि प्रपश्यन् कामपरो बभूवेति – 'बलवान् इन्द्रियग्रामो विद्वांसमपि कर्षति' अथ च

नन्वग्निः प्रमदानाम घृतकुम्भसमः पुमान् ।
सुतामपि रहो जह्याद् ह्यन्यदा यावदर्थकृत् ॥

इत्यादि व्यासवचनान्येवं प्रमाणीचकार । तदेव च रामकीर्तिकर्त्तानुपदमेव प्रतिपादयति काव्यरूपेण न व्यासवत् केवलमनुपदेशरूपेण –

तरुणी कनकं कमलं कमला जहिकस्य हरन्ति मनोहरिणम् ।
नविवेकि जनोऽपि विवर्तयितुं प्रभवेदिदमित्यमृषोधवचः ॥

कुसुमायुधशक्तिरहो! अमिता हनुमानपि यद्वशमापकृती ।
असुरीमपि सप्रणयं प्रबलः समयाचत तत्सहितो रहसि ॥

रामo १०/२५-२६

सर्वथा श्रीहनुमान् तरुणीसङ्गं विमुख इति प्रणेता स्वमिमतम् किं वा मारतीय चिन्तनं 'हनुमानपि यद्वश---' इत्यत्र उपरिलिखिते पद्येऽपि प्रत्यपादयत् । अत्रनिधिना दर्शितं स्वसामर्थ्यम् । प्रमाणयति चेदमेव तत्वं नैषधीयचरितस्य तृतीयसर्गस्थः श्रीहर्षः –

अवश्यमन्येत्वनवग्रहग्रहा
यथा दिशाधावति वेधसः स्पृहा ।
तृणेन वात्येव तथानुगम्यते
जनस्य चित्तेन मृशावशात्मना ॥

अन्यत्रापि च नीतिवचनेषु विद्वांसः –

पुष्पं दृष्ट्वा फलं दृष्ट्वा, दृष्ट्वा चनवयौवनाम् ।
एकान्ते कांचनं दृष्ट्वा कस्य नोच्चलते मनः ॥

इत्यादिभिः तमेवार्थं साधयन्ति । वशिनः पुरुषस्य कामपरवशत्वं यथाश्चर्यकरं तथा स्त्रियास्तथा श्रुतत्वन्न । तस्याः कृतेतु तत् सामान्यम् । इदमेव रहस्यमस्फोटयत् रामकीर्तिमहाकाव्ये श्री शास्त्रिमहाभागः –

यदि याति लता स्वयमेवतरुम्
यदि याति नदी च तथाजलधिम् ।

नहि तत्र विचित्रमिति प्रकटं
प्रकृतिः पुरुषं स्वयमेति यतः ॥ राम० १०/२९

इत्थं बेल्जकयी कपि सङ्घमत एका नूतना सृष्टिः प्रकटी भूत।

असुरफद समाख्यं दानवी पुत्रमेकं
कपिरमण वशेना सोऽट कालेन वीरम्
पवन सुत सुतोऽसौ दानवैः सार्धमन्यैः
दशपुरवदनं स्वं शैशवं सन्निनाय ॥
राम० १०/३०

इति हनुमत्पुत्रोत्पत्तिः सविशेषा रामकीर्तिमहाकाव्येवर्जिता।

13- एकादशसर्गे सेतुनिर्माण प्रसङ्गे नीलफद हनुमतोः विग्रहः वर्णितः। अयमपि कश्चिन्नूतन एव कथाविभागः प्रतीयते कदाचित् हनुमान् नीलफद पित्रव्ये जम्बुनामके प्रतीपाचार आसीद् इत्येव नीलफद हृदये कण्टकायते। स एव विग्रह हेतुः वर्णितः। सेतु निर्माणे च नीलफद शिलाः समुद्रे क्षिपति हनुमांश्च ताः क्रमेण व्यवस्थापयति। सत्वरं शिला प्रक्षेपः एव नीलफदः क्रोध प्रदर्शन प्रकार आसीत् ततश्च क्रमे परिवर्तिते हनुमान् प्रक्षेपकः नीलफद च व्यवस्थापकः। अयमेव कालो ममानुकूल इति विचार्य हनुमान्-

स एकैकशो रोमसु स्वेषु युक्त्या
न्यबद्नाच्छिलाखण्ड मेकेशो द्राक्।
भृशं चापि रुष्टः प्रतीकारमीप्सु-
र्निचिक्षेप तं सन्ततं तान्तचित्तः ॥
राम० ११/१५

नीलफद च तान् शिलाखण्डकान् यथावत् सन्निवेष्टुं यत्नवानपि न शशाक। इत्थमनयोः विग्रहं श्रीरामः प्रेक्ष्य उभौ दण्डयित्वा शान्तिं विनाय।

अत्र सूक्ष्मेक्षिकया अवलोकनेन कवेः वर्णनचातुरी दृग्गोचरीभवति। यदयं महाकविः इमं अन्योन्य विग्रहं कुटिलं कथानकम् सुजङ्घः प्रयत्नेन छन्दसा न्यबध्नात्।

14- द्वादशसर्गेतु भारतीयरामकथाभ्यः सर्वथा पृथगेव नूतनं किञ्चन कौतुकजनकं कथानकमुपनिबद्धम्। पूर्वसर्गे नील-हनूमतोः परस्परं विग्रहे जाते श्रीरामः नीलं किष्किंधां प्रेषितवान्, हनूमांश्चैकाकी कपिप्रवीरः सेतुनिर्माणेनियोजितः। तत्कृते च सप्ताहश्चरमावधिर्निर्धारितः। यदाह-श्रीरामः—

हनूमांश्चापि दिवसैः केवलं सप्तभिर्बुधः।
बध्नातु सेतुं येनेयं यायाल्लङ्कां चमूर्मम॥
रामा० ॥/२३

आदेशमिमं शिरसावहन् श्रीहनुमान् स्वसहायैः सह सेतु-निर्माणे दत्तावधानोऽभूत्। किञ्चतत्रैकं चित्रं समभवत्। दिवसे यानपि शिलौघानसौ समुद्रे सेतुबन्धनाय निक्षिपति तान् रात्रौ कोऽप्यपहरति। एतत्कार्यं कः करोति? विस्मितोऽसौ कपिर्व्यचिन्तयत्—

शिलाः समुद्रे दिवसे क्षिपामो
लोपंतु ता यान्ति कथं निशायाम्।
कस्ताः किमर्थं च नयत्ययं मे
विचिन्तनीयो विषयोऽस्ति सूक्ष्मम्॥
रामा० १२/१

इति शिलालोपकारणं जिज्ञासुरसौ रात्रौ निद्रां विहाय अन्तः समुद्रं गतः विचित्रादृश्यं समवालुलोके।

मत्स्यांश्च मत्सीश्च सहस्रशोऽसौ
पुक्तांशिलानां व्यपरोपणाय।
ददर्श राशीमपि तत्र तेषां मासन्निभे
व्यद्रुचनात् प्रवृत्तान्॥
रामा० १२/१२

रावणपुत्री सुवर्णमत्स्या या चार्चां शरीरेषु मत्सी रूपासीत् अर्चनं च मनुष्ययोनिरासीत् सैव स्वपितुराज्ञया सेतु-निर्माणे विघ्नमूतासीत्। स्वसहायैः बलवत्तरैः मत्स्यै रात्रौ शिलासंघातं ~~कृपहरतीति हनुमता~~ ~~दृष्ट्वा सैवान्यगादीत् रहस्यमिदम्॥~~

रहस्यं व्यचूचुरत्।

ज्ञानिनामग्रगण्यश्चाञ्जनेयः स्वकीयैः श्लक्ष्णैर्वचनैस्तां प्रबोधयत् -

श्रीरामपत्नीमहरत् पितातेः
छलेन साध्वीं घृतसाधुवेषः ।
अधर्म्यमाचारविवर्जितश्च
कार्यं कृतं तेन जघन्यमेतत् ।।
रामा० ५/३।

अपिच - पितापि यद्युत्पथमाश्रयेत
वर्ज्यो भवेदेव कदन्नवत्सः
साहाय्यमस्य प्रविधेहि नत्वं
विवेकिनामग्रसरासतासि ।।
रामा० ५/३३

इत्येवं प्रबोधिता सा सुन्दरी सेतुविघ्नकरणात् विरम्य सत्प्रबोधनेन करण्यमतिर्न विमला भवेत् । सुवर्णमत्स्या स्वप्नमेव वचनप्रभावं स्वीचकार -

मूढा पितुर्मोहवशं गताऽहं
साहाय्यमस्याचरितुं प्रवृत्ता
मोहोऽस्ति नष्टो वचनैः समेऽद्य
श्लक्ष्णैस्त्वदीयैः सुविचारवद्भिः ।।
सज्जाऽस्मि कर्तुं वचनं त्वदीयं
सर्वेऽनुगामे निरता भवन्तु
स्वाने स्थिताः सन्तु शिलास्तवेताः
सिद्धोऽस्तु ते भद्र मनीषितोऽर्थः ।।
रामा० ५/३७-३८

इत्थं तदीयं सुमधुरवचनोच्चारमाकर्ण्य कपिप्रवीरः पुनरपि पञ्चबाणबाणप्रहाराणां पात्रमभवत् । रामकीर्तिमहाकाव्ये हनुमतश्चरितं चरित्रं भिन्नमेव दिशमनुसरति । एकदा वैभ्राजकाख्यासरस्तोऽभवत् । अद्य च सुवर्णमत्स्या तत्प्रीतिपात्रतां गतवतो । हनुमतोऽन्ये सर्व एव गुणा रामकीर्तिमहाकाव्येऽपि तथैव वर्णिता यथा भारतीय रामायणनाथस्य । किन्तु ~~अस्मिन् बिन्दौ~~ सर्वथा विचित्रमेव वृत्तमाविष्कृतम् ।

(एतद्वैशिष्ट्यं)

कविरपि प्रसङ्गेऽस्मिन् शृङ्गारी प्रतीयते।
"शृङ्गारी चेत्कविः काव्ये जायते जातं रसमयं जगत्" तदेवाच्यप्रकृत-
काव्यस्य द्वादशतमे सर्गे शृङ्गाररसनिर्झरिणी प्रवाहिता दृश्यते।
हनुमतः विचित्रं वचनविन्यासमाकर्ण्य सुवर्णमटस्था दुर्वीभूता
मनसा कामवशं गता। 'सुन्दरं पुरुषं दृष्ट्वा चाच्यवते हि रिरंसया'
इत्युक्तिमेव चरितार्थयन्ती सा सकामा विचारयति —

दृष्ट्वैनमद्य मनसः सुतरामनीषा
जाने न किं खलु मया करणीयमद्य।
पर्याकुलेव लुलितेव सुविह्वलेव
वल्लीव पौरुषतरुं श्रयितुं लषामि॥

रामः १२/४२

सुवर्णमटस्थायाः मनोदशा कियतासार्थकेन विशेषणसमूहेन वर्णिता
या खलु पर्याकुला लुलिता सुविह्वला च जाता सा कथं मनोविकारं
प्रशमयेदिति न जाने। "दूरं रक्ता भवेन्नारी पुमान् परश्चाङ्गितैः"
इति नियमानुसारेण तस्यां दृढमनुरक्तायां सत्यां वायुपुत्रस्या
पि कामना निर्मर्यादं वर्धते —

..... वायोः सुतोऽपि कमनीयतमाङ्गयष्टिः
पश्यन्नतां स्वमनसः प्रबभूव वीरः॥

रामः १२/४५

यस्य मनो यत्रानुरक्तं भवेत् तत्तस्यारमणीयमपि रमणीयं भवेत्,
किं पुनः या निसर्गसुन्दरी, तथाहि —

सौन्दर्यमद्भुतमनिन्द्यतमं जगत्यां
वर्णः सुवर्णमिव कोकिलवत्स्वरश्च।
भ्रूभङ्गवल्लीव नु कुन्तलराजिरस्याः
कं वा नहि प्रमदयेत् प्रमदोत्तमेयम्॥

रामः १२/४५

इति यावत् मारुतिर्विचारयति तावत् —

(अनुभावाः) चीरं विलोकयति विस्फुटमन्दहासा
वाचं नमिश्रयति वानरवीरवाच्यां
आविष्करोति दृढभूमिमुपेयिवांसं
निःश्वासवायुमिषतः स्मरदाहमेव॥

रामः १२/४६

त्रिभुवनविलासः काव्यकोटिमाक्रन्दः कियन्मनोरञ्जनमवति?
रामकीर्तिमहाकाव्ये तदेतदतिरमणीयमिति प्रस्तूयते —
सम्भोगशृङ्गारस्य हि काव्येषु तथानिदर्शनमति दुर्लभम्।
आञ्जनेयसुवर्णमत्स्ययोरयं विलासश्चिरञ्जयतु
तौ कथमन्वभूताम् रसराजरसम्?—

अन्योन्यमेवमविवृप्ततयोपपन्नौ
गाढोपगूहनसुखाकुलितान्तरङ्गौ।
वायोः सुतश्च रमणी च सुवर्णमत्स्या
गाढं बभूवतुरतौ मदनेषुविद्धौ॥

आनन्दमापतुरतौ चिरमगम्यं
संमीलिताक्षियुगलौ परिचुम्बनाद्यैः।
रागाङ्कुरस्फुरणताम्रकपोलयुग्मौ
वक्षोनिपीडमधरामृतपानमग्नौ॥

रोमोद्गमप्रकटरागविशेषवृत्ती
विद्धौ समं मनसिजासमपुङ्खपत्रैः।
आवद्धबाहुयुगलौ परिजृम्भवन्तौ
स्वेदाम्बुजालजटितालकजालकालीः॥

अन्योन्यचुम्बनपरौ रतिकर्मसक्तौ
सम्प्रापितौ मनसिजेन दशां विचित्राम्
आनन्दसागरतरङ्गपरम्परासु
प्रेङ्खोलितौ समसुखौरजनीं व्यनेष्टाम्॥

इत्थं हनुमतः स्त्रिया सङ्गमः भारतीयकथासाहित्यकृते कश्चित् नूतन एव पन्थाः। अनेन प्रकरणेन पाश्चात्यानां जीवने स्वर्गीयविलासस्य प्राचुर्यमपि सिध्यति। एकश्चाधिको विशेषः —

हनुमतः पूर्वं बेञ्जकन्यया सङ्गमोऽभूत्। सत्वाकाशे समजातः। अयञ्च द्वितीयः सुवर्णमत्स्यया सह विलासः समजातः सच जले इति सर्वं अद्भुतमेव। जले वा वियति वा स्त्रीविहारोऽपि

त्रिभुवनविलासः काव्यकोटिमारूढः कियन्मनोरञ्जको भवति?
रामकीर्तिमहाकाव्ये तदेतदतिरमणीयमिति प्रस्तूयते —
सम्भोगशृङ्गारस्य हि काव्येषु तथा निदर्शनमति दुर्लभम्।
आरूढेयं सुवर्णमटस्य यौ स्यं विलासश्चिरञ्जयतु
तौ कथमन्वभूताम् रसराजरसम्?—

अन्योन्यमेवमविदृप्ततयोपपन्नौ
गाढोपगूहनसुखाकुलितान्तरङ्गौ।
वायोः सुतश्च रमणी च सुवर्णमटस्य
गाढं बभूवतुरमौ मदनेषुविद्धौ॥

आनन्दमापतुरमौ चिरमगम्यं
संमीलिताक्षियुगलौ परिचुम्बनैर्यैः।
रागाङ्कुरस्फुरणताम्रकपोलयुग्मौ
वक्षोनिपीडमधरामृतपानमग्नौ॥

रोमोद्गमप्रकटरागविशेषवृत्तौ
विद्धौ समं मनसिजास्त्रमुखेन पत्नीः।
आवद्धबाहुयुगलौ परिजृम्भवन्तौ
स्वेदाम्बुजालजटितालकजालकालीः॥

अन्योन्यचुम्बनपरौ रतिकर्मसक्तौ
सम्प्रापितौ मनसिजेन दशां विचित्राम्
आनन्दसागरतरङ्गपरम्परासु
प्रेङ्खोलितौ समसुखौरजनीं व्यनैषम्॥

इत्थं हनुमतः स्त्रिया सङ्गमः भारतीयकथासाहित्यकृते कश्चित् नूतन एव पन्थाः। अनेन प्रकरणेन पारदेशीयानां जीवने स्वर्गीयविलासस्य प्राचुर्यमपि सिध्यति। एकश्चाधिको विशेषः —

हनुमतः पूर्वं बेञ्जकन्यया सङ्गमोऽभूत्। सत्वाकाशे समजातः। अयञ्च द्वितीयः सुवर्णमटस्य या सह विलासः समजातः सच जले इति सर्वं अद्भुतमेव। जले वा वियति वा स्त्रीविहारोऽपि

भारतीय साहित्ये सामान्येन नादृतः। अद्यापि तद्देशीया एव रुचिः स्फुरति। सर्वत्र सर्गास्वपि चावस्थासु ते युज्यते।

इतश्च हनुमतश्चरित्रे विशेषोऽयत् वाल्मीकीयो हनुमान् क्वचित् रामस्य कार्यप्रसङ्गे सर्वथा स्वसुखनिरभिलाषो भवति। क्वचित् रामाज्ञया गच्छन्नसौ विश्रामम्पि विघ्नापदो स्थापयति। सीतान्वेषणप्रसङ्गे लङ्कां जिगमिषुरसौ समुद्रलङ्घनं करोति। मैनाकस्तस्य विश्रामार्थमुत्थितो। प्रीतो हृष्टमनाः स कपि सुवाच — मैनाक —

तिष्ठ त्वं हरिशार्दूल मयि विश्रम्यगम्यताम्
तदिदं गन्धवत् स्वादु कन्दमूलं फलं बहु
तदास्वाद्य हरिश्रेष्ठ विश्रान्तोऽधगमिष्यसि॥

वा० सु० १/११६

इति सानुरोधं प्रार्थितोऽपि हनुमान् तद्भुजां नास्वीकरोति स्वलक्ष्यञ्चैवं स्थिरी करोति —

एवमुक्तः कपिश्रेष्ठस्तं नगोत्तममब्रवीत्।
प्रीतोऽस्मि कृतमातिथ्यं मन्युरेषोपनीयताम्॥
त्वरते कार्यकालो मे महच्चाप्यतिवर्तते
प्रतिज्ञा च मया दत्ता न स्थातव्यमिहान्तरा।

वा० सु० १/१३०-३१

अस्यैव च्छाया श्रीरामचरितमानसे श्रीतुलसी विरचिते राष्ट्रभाषायां प्रतिबिम्बिता —

हनूमान तेहि परसा कर पुनि कीन्ह प्रनाम।
रामकाज कीन्हे बिनु मोहि कहाँ विश्रामा॥

राम० सु० दोहा-१

रामकार्यं प्रस्थितो हनुमान् क्वचिदपि न शिथिलीभवति आसनमपि नाद्रियते सपर्यामपि विघ्नमाकलयति। रामकीर्तिमहाकाव्ये त्वितोऽन्यथैवासौ चित्रितः। तत्र वैदूर्यकया सुवर्णमत्स्ययोः प्रसङ्गाभ्यां परिलक्ष्यते। तत्रापि च नामासक्तिः सहसोद्भुद्धाऽतीव चित्ताकर्षी। तदास्ताम् — सुवर्णमत्स्यासङ्गेऽपि पुनर्मिलं

सलब्धवान्।

मच्छानुरिति नामायं कालेनवर्धते सुतः।
पितृवच्चैव बलवान् कालेन समजायत॥

रामा०२/55

15- त्रयोदश सर्गे रामकीर्ति महाकाव्ये निबद्धं मैयराबोपाख्यानन्तु रामायणेषु प्रसिद्धस्याहिरावणस्यैव छायां बिडम्बयति। अहिरावणोऽपि पातालदेशं शास्ति मैयराबोऽपि तथैव। तस्यापि द्वारपालो हनूमत्पुत्रो मकरध्वजोऽस्ति। मैयराबस्यापि मच्छानुरिति नामधेयः सुवर्णमत्स्यायां जातः हनुमत्तनूज एव। उभयत्रापि पितापुत्रयोः परस्परं युद्धमस्तीति वर्णनं प्राप्यते। विशेषस्तु केवलमियानेव यत् मैयराबो रावणमित्रत्वेन वर्णितः स चाहिरावणस्तत्पुत्रत्वेन प्रतिष्ठः। तदेतत् सूक्ष्मतरमपि कथानकं कविप्रतिभया वृक्षारमपि च रमणीयं जातम्।

16- चतुर्दशे सर्गे हनुमतोऽतुलितां शक्तिं वर्णयित्वा कविपुङ्गवः श्री सत्यव्रतो महाभागः वीरक्वनोपाख्यानं निबध्नाति। याकिल मैयराबस्य भगिनी वर्तते। तां सदतीं दृष्ट्वाञ्जनेयस्तस्याः परिचयं लोकाश्च पृष्टवान्। ततः सैवंस्वपरिचयमाह-

स्वसास्मि पातालनृपस्य तावद्
वीरक्वनाख्या विलपाम्यहं भोः!
कृते तनूजस्य सुविह्वलाहं
सुतः प्रियः सर्वजनस्य नूनम्॥

रामा.14/16

पुत्रोऽस्तिमे वैयविगाख्य एको
यं हन्तुमिच्छत्यध मैयराबः।
भ्राताऽपि सन्मे सुतरां कुबुद्धि-
रन्याय्यमस्मिन् प्रविवृत्सतीह॥

रामा.14/18

इदं वीरक्वना वैयविगाख्यानं रामायणकथातः सुतरां नूतनम्। किन्त्वस्मात् कथानकादेशे तत्त्वमेकं प्रस्फुरति। तच्चेदम्-

मध्यकालिकसाहित्ये मायामयकथानकानि बहुशः साहित्यकारैः वर्णितानि। न केवलं गीर्वाणवाण्यामपि तु देशीयभाषास्वपि तेषां प्राचुर्येण वर्णनमाप्यते। यथा कस्यचित् दानवस्य प्राणाः क्वचित् पर्वतगुहायां पक्षिरूपेण विद्यन्ते। तस्मिन् हते तिर्यञ्चि सोऽपि राक्षसः मृतो भविष्यति। शरीरादन्यत्र कस्मिंश्चित् जीवे तस्य प्राणाः इति कल्पनालोके एव। कविप्रतिभायाः बलेन तत्रैव दृष्टान्ता यथार्थतयेन श्रूयन्ते पठ्यन्ते च। किन्तु रामकथायां मन्ये, तादृशो नास्ति कस्मिन्नपि राक्षसे प्राणानां सञ्चारः। यः शरीरात् बहिरेव तिर्यग्रूपेण विद्यमानतां गच्छेत्।

रामकीर्तिमहाकाव्ये तदेव पश्यामः। मैयराबस्य प्राणाः शरीरात् पृथगेव तिष्ठन्ति। यथा -

विनिर्मितं चायसशृङ्खलाभिः
सुरक्षितं पञ्जरमेकमास्ते
यस्मिन्नतिष्ठत् खलु मैयराबस्यात्मा शरीरात् पृथगेवतस्य॥

राम०५/५५

इदं पञ्जरं प्राभञ्जनिः बभञ्ज। तथापि मन्ये तदात्मा समुत्प्लुत्य चित्रकूटाख्यं पर्वतं शिश्रिये। स च भृङ्गरूपेण। यदा हनुमान् मैयराबेण चिरं निर्युद्धयापि नविजयमाप तदा वीरबाहुना रामं प्रति वाचः -

ततो वीरबाहुना प्राह हनूमन्तमिदं वचः।
लब्धोऽनेन वरो मह्यं येन हन्तुं न शक्यते॥
प्रथमं यावदात्माऽस्य हन्यते नहि केनचित्।
तावद्धन्तुं न शक्योऽयं देवैरपि कदाचन॥
यावद्वक्ष्यमाणश्रृणोदिमां वीरबाहुना गिरः।
तावद्विराट्स्वरूपं स्वं वितताम महाकपिः॥
क्षणेन चित्रकूटाख्यं पर्वतं समुपेयिवान्।
भृङ्गरूपं समापन्नं तदात्मानमवेक्षत॥
समापत्य च तं धृत्वा चात्मकरे कपिः।
तद्क्षणं मुष्टिनिष्पेषं निष्पेषेण व्यधत्त वा॥
तस्मिन्पिष्टे मैयराबो निःसञ्ज्ञो भूतलेऽपतत्।
अलुठत् दीनवच्चापि दशकण्ठसखः शठः॥

राम० ५/६१-७५

इत्थं रामकथायां मैयरावस्य मरणप्रकारमाकर्ण्य कस्यनचेतश्चमत्कृतं स्यात्।

17- रामकीर्तिमहाकाव्यस्य पञ्चदशतमे सर्गे रावणावरजस्य महाबलिनो राक्षसैरपि धर्मचेतसः कुम्भकर्णस्य युद्धवर्णनमस्ति। सोऽयं दनुजोऽतिविचित्रं युद्धं करोति। रामायणीयकुम्भकर्णात् पृथगेवास्य पन्थाः। 'तं युद्धायागच्छन्तमवलोक्य विभीषणो निवर्तयितुमुद्यतः तेन च भ्रातृद्रोहीति कृत्वा भर्त्सितश्च। ततो विभीषणेन कीर्त्यमानं -

नापृथग्जनवद्रामो द्रष्टव्यो येनकेनचित्।
इलोकभवतीर्णोऽयं साक्षान्नारायणः प्रभुः॥
शुश्रूषातस्य सर्वेषां कर्म पुण्यतमं मतम्।
इत्येव धियमाश्रित्य तमहं समुपस्थितः॥ राम० ७/२३-२५

इत्यादिना रामहिमानमाकर्ण्य कुम्भकर्णो विचित्रानेव प्रश्नान् स्वकल्पितान् करोति। कथयति च यद्येतान् मम प्रश्नान् रामः समाधत्ते तदा स नारायणः एव स्वीकार्यो भवेदिति। तेन च तत्कल्पिताः कौतुकवर्धनाः प्रश्नाः + इत्थंरूपाः —

को नामास्ति यतिर्मूढो दन्ती ऋजुरदस्तथा।
का चास्तिच्छलिनी योषा को न्वस्ति च शठः पुमान्॥
राम० ७/२५

न च कश्चिदपि श्रीरामसैन्ये शक्तोऽमूनविचित्रकूटान् प्रश्नान्निमान् स्फोटयितुम्। ततः स एव अङ्गदेन प्रेरितः कुम्भकर्ण उत्तरयति—

स्त्रैणो यतिर्राम एव यो मार्यामजहात्प्रियाम्।
एकाकिनीमरण्येऽपि हैमं मृगमभिद्रुतः॥
ऋजुदन्तः कुञ्जरो हि लङ्काधीशोऽस्तिरावणः।
परस्य मार्यां योऽकाङ्क्षदसन्तुष्टः स्वमार्यया॥
शूर्पणखास्तिच्छलिनी योषा या रामलक्ष्मणौ।
अवशा स्वस्य कामान्धा प्रेषदे पुंश्चली यथा॥
शठः पुमांश्चनो वंश्यो विभीषण इतीरितः।
येन कृतो राजद्रोहो देशद्रोहश्च गर्हितौ॥
राम० ७/३७-४०

इत्थं प्रश्नव्याख्यां कुम्भकर्णस्याभि-

प्रेतमेव ~~सन्~~ सन्दर्शितम् । अनेन कूटकल्पनेन कवि चातुर्यमेव स्वीकुर्मः ।

वाल्मीकीयः कुम्भकर्णो ~~मात्र~~ केवल बलप्रधानः । रामकीर्तीयस्तु बलेनसहैव बुद्धिप्रधानोऽपि दृश्यते । सरभसैन्यं जेतुं बलापेक्षया बुद्धेः प्रयोगमेव प्राचुर्येण कुरुते । सुग्रीवोऽसाधारणो योद्धा इति जानन् सः तस्यबलापचयं विधातुं युक्तिमेकामाश्रयते । स्वबलाभिख्यानं कुर्वन् कुम्भकर्णः सुग्रीवं ब्रूते—

मन्यसे यदि शक्तिस्ते मत्तोऽस्ति प्रबलातदा ।
गच्छ सुग्रीव शीघ्रं त्वं हिमवन्तं नगाधिपम् ॥
गत्वात्वं तत्र रङ्गाख्यं महाद्रुमुपानय ।
युद्ध्यस्व तेन घोरेण मया सह च वानर ॥

रामा० ६/५६-५७

इति तस्याभिप्रायमजानन्नेवासौ हिमवन्तं प्रययौ रङ्गाख्येन द्रुमेण च प्रत्यावृत्तः । प्रहरक्रमेण वृक्षे मग्ने सद्रुनरपि गतस्वग्नेयुं इति गतागताभ्यां कितवं श्रान्तोऽभूत् । ततः—

श्रान्ते तस्मिन् महावीरेऽनायासेन दानवः ।
तं विजिग्ये प्रतस्थे च तं स्वकक्षे विधारयन् ॥

रामा० ६/६१

इति बुद्धिबलेन युक्त्यैव सुग्रीवः कुम्भकर्णो जितवान् । रामायणकथासु रावणमेघनादयोर्मध्येयुद्धं शक्तिप्रदर्ययेऽनुष्ठानादेर्वर्णनमस्ति । कुम्भकर्णस्तु शरीरबले एव विश्वसन् युद्ध्यतीति वर्णनं प्राप्यते । किन्तु रामकीर्तिमबलम्बये कुम्भकर्णोऽपि तमेवोपायमाश्रयते—

शक्रं जागरणं शक्रमेव दैवतप्रजया ।
इति सञ्चिन्त्य दैत्योऽसौ तदर्थं समनह्यत ॥

रामा० ६/५६

यद्यपि प्रजेयं हनुमदङ्गदाभ्यां विदिता । ततोऽपि स उपायान्तरमाश्रयते । यथा स्वशरीरवृंहणेन नदीजलरिक्तः । तेन च पिपासया रामसैन्यहननेयोगः । इत्यपि कुम्भकर्णस्यैव बुद्धिव्यापारः इतरसाधारणः । अन्ततश्च श्रीरामेणानायासेनैव तस्यवधस्तु साधारण एव ।

18- भारती येषु समायणेषु रामकीर्ति महाकाव्ये च प्रायः सर्वत्र श्रीलक्ष्मणे शक्ति प्रहारः श्रीलक्ष्मणस्य मूर्च्छाभावश्च राम-रावणयो र्युद्ध प्रसङ्गे वर्णितः। तथा वाल्मीकीये इन्द्रजित् रामलक्ष्मणावुभावपि स्वास्त्रजालैरचेतनौ करोति -

ततस्तु तावि न्द्रजितोऽस्त्रजालै-
बभूवतुस्तत्र तदा विशस्तौ
स चापि तौ तत्र निषादयित्वा
जनाद हर्षाद् बुधिरासनेन्द्रः॥
वा० युद्ध० 73/73

इत्थं द्वावपि ब्रह्मास्त्रेण मुमुहतुः।
अध्यात्मरामायणे तु केवलं लक्ष्मण एव मोहं गतः। सच रावण प्रयुक्तया शक्त्या। रावणो विभीषणं प्रति मघवशक्तिं उत्सर्ज। किन्तु श्रीलक्ष्मणं तामापतन्तीं मत्वा तस्य विभीषणाय दत्तामयः पुरतोऽतिष्ठत् -

विभीषणस्य पुरतः स्थितोऽक्ष्यश्वाचलः।
सा शक्तिर्लक्ष्मणतनुं विवेशामोघ शक्तिकः॥
अध्या० युद्ध - 6/7

अनेन प्रहारेणशक्तोऽपि श्रीलक्ष्मणो मुमोह -

मायाशक्त्या नवेत्किंवा शेषांशस्य हरस्तनोः।
तथापि मानुषं भावमापन्नस्तद्बुधुवतः
मूर्च्छितः पतितो भूमौ तमा दातुं दशाननः॥
अध्या० युद्ध - 6/10

रामकीर्ति महाकाव्येऽत्यापि विशेषः। अत्र - श्रीलक्ष्मणः कुम्भकर्णेन मूर्च्छितः। यस्यः शक्त्या जागरणं विहितम् तयैव स प्रहृतवान्-

तया स शक्त्या प्रहतः प्रगाढं
सौमित्रिरासीत् पतितो विसंज्ञः।
शुचापवीतान् विदधत्स्ववन्धून्
नैराश्यमेषांजनयंश्च तीव्रम्।
राम० 10/71 इति

" केवलं मूर्च्छाभावे विशेषः, मूर्च्छापनयनार्थमौषधेः आनयनमपि भिन्नतयैव वर्णितम्।
वाल्मीकीये श्रीहनुमान् हिमालयादौषधिपर्वतमानयति।

सतस्य पृङ्गं सनगं सनागं
सकाञ्चनं धातुसहस्रजुष्टम्
विकीर्णशृंगं ज्वलितावशानुं
प्रबृंहयन्वे गात् सहसोन्ममाथ ॥
सतं समुत्पाट्य स्वमुत्पपात
विश्वास्य लोकान् सयुगसुरेन्द्रान्।
संस्तूयमानः स्वचरैरनेकै-
र्जगाम वेगाद्गरुडोग्रवेगः ॥
वा० युद्ध० - 74/67-68

एवञ्चाध्यात्मरामायणे श्रीहनुमान् महौषधीः समोक्तुं क्षीरसागरं गच्छति -

रामेण प्रेषितो देवो हनूमान्क्षीरसागरम्
गतो नेतुं लक्ष्मणस्य जीवनार्थं महौषधीः ।
मध्या. युद्ध० 6/35

किन्तु रामकीर्तिमहाकाव्ये श्रीहनुमान् दिव्यौषधिमानेतुं विभीषण प्रोक्तो विचित्रं ~~सर्व~~ सर्वयनामकंगिरिं गच्छति -

एवंस्थिते तत्र विभीषणस्तान्
सम्प्राहैषीः सर्वयपर्वताद् द्राक् ।
दिव्यौषधिं यूयमिहानयध्वं
तां सेवयध्वञ्च विसंज्ञमेनम् ॥
राम० 15/72

श्रुत्वादरेणीयं वचनं गरीयः
कालस्य हानिं परिहर्तुकामः
उत्पुप्लुवे द्यां पवनस्यपुत्रो
गिरिं प्रतस्थेच स सर्वयाख्यम् ॥
राम० 15/74

एवं च यदा हनूमान् औषधि मानेतुं प्रतस्थे तदा मध्ये-मार्गं विघ्ना अपि उपस्थिताः । रावणो हनूमन्तं व्रजन्तं ज्ञात्वा श्रुत्वादाकर्ण्य कालनेमिनामानंरक्षसं विघ्नोत्पादनाय तस्य कर्मणि प्रेषयति । हनूमांश्च तं बुद्धिबलेन निहत्य स्वकार्यं साधयामास ।

रामकीर्ति महाकाव्येऽत्रावियेऽटव्यतीव कौतुकवर्धकं वर्णनमस्ति।-

हनुमान् यदा प्रतरन्धे सरान्नोरश्मकालं: वृक्षचयनिशानाशात् पूर्वमेवौषध्यानयनं सम्यादनीयं वर्तते। यदाह विभीषणः -

प्रागेव सूर्योदयतः परेद्युः
रेषौषधिस्तावदनेन सेव्या।
ततः परस्तान्नहि कश्चिदस्य
स्याल्लाभ औषधयनुसेवकेन॥
राम. 15/73

किन्तु मध्येपथं सूर्योदयो जातः। ततो धैर्यचनो मारुतिरेनं पथः च्यावयितुं तन्निकटे गतः ततेजसा संक्षुब्धसर्वावयवोऽनुकम्पिना सूर्येण रामकार्यार्थं गच्छतीतिकृत्वा पुनरपि सञ्जीवितः। पुनश्च भगवान् मारुतः पथोदान्तरितो दिवाऽपि रात्रिभ्रमं चकारेति महदद्भुतं सञ्जातम्। अथ सर्वत्यागिरिङ्गतो यावदौषधिमाकारयामास तावत्सा कथंचित् क्वचिच्चौचैः स्वोपरिस्थितिं ब्रुवाणापि नदृष्टिपथमङ्गतेति नैकवारं उच्चैः नीचैर्गतागताभ्यां श्रान्तः खिन्नश्च शनिनामग्रगण्योऽसौ विधिनैवौषधिं गृहीत्वा विहितं विधानेशातुमत्वबद्धेव। तच्च -

अभ्युद्गतं पञ्चनदीजलैः स्या-
त्पथौषधैस्तर्हि विचित्ररूपा
चेन्नोऽमुष्या सेव्या भवेत्सेति विधातमेतत्
तदर्थमासीत् विहितं विधिज्ञैः॥
राम. 15/84

पञ्चनदीजलानि च कुतः प्राप्येरन्। यतस्तानि भरताधिकारे पुण्येऽयोध्यानगरेऽवर्तन्त। अत्र हनुमतोऽद्भुतिता शक्तिः सकलसुरासुरातिशायिनी दृग्गोचरी भवति। तस्य सपद्येवायोध्यागमनं ततश्च पञ्चनदीजलानयनं तैश्च सम्प्रोक्षितामोषधिं गृहीत्वा त्वरितमेव रघवं प्रत्यानयनमिति सर्वमत्यन्तसम्पादितमिवाविश्वसनीयमिव चमत्कृतमिवालौकिकशक्तिसाधितमिव देवकृतमिव प्रतीयते।
इत्येषः प्रसङ्गः महताऽऽदरेणवर्णितोरामकीर्तिमहाकाव्ये।

सञ्जीवितश्च श्रीलक्ष्मणः। श्रीरामेण ब्रह्मास्त्रप्रयोगेन हतश्च कुम्भकर्णः।

19- षोडशे सर्गे कथानकस्येयं विशेषा विच्छित्तिर्यत्ते यद् इन्द्रजित् प्रयुक्ते नागपाशे रामवाहिन्यां निबद्धायां श्रीरामो गरुडानयनाय शरमेकं दिव्यं वैवद्वं नामकं मुञ्चति। तुल्यं शरं गत्वा गरुडं संकेतयति। तेनैव च संकेतेन गरुडः समागत्य नागान् विद्रावयतीति। यथा-

वैवद्वारव्याच्छरादाशमुक्तात्तत्रसमापतत्।
गरुडो येन सर्वेऽपि नागा याता यथागतम्॥
राम. 16/4

इति रामबाणस्य विचित्राशक्तिरत्र प्रदर्शिता। रिपुं हत्वा रामशराः पुनरागत्यतूणीरं प्रविशन्तीति तु सर्वत्र तत्रामर्ष्यं प्रकाशितं, किन्तु वाक्शक्तेः संकेतप्रदानशक्तेर्वा ~~अवर्णनं~~ वर्णनं नास्मिन्नेव थाइदेशीयरामायणे प्रतिबिम्बितं ~~कोऽपि~~ ~~श्रीस्वयंवृतशास्त्रनिबद्धे~~ श्रीरामकीर्तिमहाकाव्य एव विहितम्।

20- कोनाशनिकेतनातिथित्वं स्वीकृते इन्द्रजिति रावणो श्रीरामविजयाय शतनमुखश्चोपायमेकमन्वयते। यथा सपितामहं ब्रह्माणं, यस्य मलिवग्गब्रह्मा, मालीवराजेति नामधेये थाइदेशीयरामायणे प्रसिद्धे, स्वदूतान्यां मान्यविग्वापुवंगेतिविचित्रनामधेयाभ्यां श्रीरामस्य लङ्कामाक्रान्तवतो जघन्यमन्याय्यञ्च कर्म निवेदयति। अत्रास्थाय समभिसन्धियत्तस्य प्रतिवेदनङ्कर्णगोचरीकृत्य पितामहो रामं शरस्यति येन श्रीरामो विनाशमेयात्। तादृशे तद्विचाराः प्रवञ्चनपराः-

रामेणकर्मचरितं जघन्यं, मदेशमाक्रान्तवतेति तथ्यम्
पितामहो यदवबोधितः स्यात् प्रत्याचितश्चापिविनिश्चयेन॥

न्यायप्रियत्वाद् ध्रुवमेवरामं शपेतकोपस्यवशंगतः सन्।
न्यायप्रियोऽपं नहि रेखयापिन्यायात्पथः प्रच्यवनं सहेत॥
राम० 16/12-13

प्रश्न दूरदर्शनीयं
कियदंशो पदर्शनीयं भूमिकामधिरोहति दशकन्धरः,
यदसावन्याय्यो न्यायप्रियं दुर्मर्षः सुमुखं ताम्रमूर्धजं
सुकेशं, विरूपाक्षो विशालाक्षं, सुदुर्वृत्तो न्यायवृत्तं महो-
दरो वृत्तमध्यं श्रीप्रियदर्शनः प्रियम् श्रीरामं तद्विपरीत-
मेव पश्यति। दुराचारोऽपि सदाचारस्थान्यायं ब्रह्मणे निवेद-
यति। तत्रापि ब्रह्मणो न्यायप्रियत्वमुद्देश्य तत्कृतेन
शापप्रदानेन श्रीरामस्य विनाशमाकाङ्क्षति। नय
खलमनोरथाः कदाचित् सिद्ध्यन्ति। अतएव ब्रह्मा
रामस्य विदितवृत्तं तमेव जघन्यकर्माचारं रावणं
शपेति कौतुकवर्धिनी वृत्तान्तकथात्र दृश्यते।
ब्रह्मणः प्रतिक्रिया वर्णिता यथा—

रामस्य दण्डं दशकन्धरेण
सम्प्रार्पितोऽसौ सुमुवाच वाचम्।
यावन्न हन्ये रघुनन्दनस्य
वक्त्रं तथा वा जनकात्मजायाः॥
रामा. 16/21

..... न निर्णयं तावदहं प्रवक्ष्ये॥
रामा. 16/22

विदेहजायावचनं तथा च
रामस्य सर्वे विबुधा अशृण्वन्।
तेषां प्रमाणेन मलीवराजः
कृतागसं रावणमभ्युपागात्॥

शापं स तस्मै व्यसृजत्समन्युः
श्रीरघवेन्द्रास्त्रवधामिसन्धिम्।
विसृज्य शापं च सुरैः समेतो
यथागतं स प्रययौ स्वधाम॥
रामा. 16/24-25

तत्परावणस्यैव कादशा जातेति मन्ये सैवर्षिर्वर्णितम्—

व्रीडावनम्रो दशकन्धरोऽपि स्वचिन्तितार्थप्रतिकूलभावात्।
विच्छायवक्त्रोऽर्क इवोपरक्तश्चिन्ताचिताध्वस्त इवाबभासे॥
रामा. 16/26

२१- यथाहि मे परावस्थात्मनः पृथग्वस्थानं वर्णितं रावणस्य अपि आत्मा शरीरात् पृथगेव तिष्ठतीति हनुना श्रीरामस्तं हन्तुं न पारयति। तस्य चात्मा गो पुत्रनामकस्य तद्गृधराक्षसे गृध्रगोपितृ पञ्जरस्थस्तिष्ठतीति विभीषणेन सूचितम्।-

स्थापितो ऽस्ति खलु पञ्जरे आत्मा
रावणस्य दनुजप्रवरस्य।
पञ्जरं वसति चास्य हृदयेगो -
पुत्रसंज्ञक मृषेर्निलये मो:॥
राम० 17/8

एतादृशं मायामयं वृत्तं भाई देवीयरामायणे एव प्रवृत्तम्। अन्यच्च श्रीहनुमता रावणात्मानं हन्तुम् यच्छलमाश्रितं तदपि भारतीयरामकथानिबद्धहनुमच्चरित्रस्य विभेदकम्। स हि लंका प्रवेशादौ निभृतं रूपपरिवर्तनादिकन्तु स्वीकरोति किन्तु वीरोचितचरित्रविपरीतमसत्यभाषणं नाङ्गीकरोति। नच कस्यामप्यवस्थायां श्रीरामस्य निन्दनं शृणोति वा। प्रायः पराङ्मुखेनैव साध्यं साधयति। इह त्वन्यथैव चिन्तितो हनुमान्— गो पुत्रमृषेराश्रमं प्राप्य तमुवाच-

प्राप्यचैनदथमाह मृषिं तं
मान्यतेऽस्मिन् शरणं प्रतिपन्नः।
रामनामकजनं परिचर्य
नाशितोऽपि फलमस्त्यृषिवर्य॥

तेन मान्यवर विप्रकृतोऽस्मि
धिक्कृतोऽस्मि बहुधापकृतोऽस्मि
नक्षणं क्षणमपि प्रतिपन्न-
स्त्वां शरण्यमहमस्म्युपपन्नः॥

इत्यलीकवचनम्। तवार्च्य
न कुवचसि चे वसतिर्मे
शोचतेऽस्ति सरली मनसास्मि।
यो निजाश्रितजने नहि साधु
स्त्याग एव खलु तस्य हि साधुः॥
राम० 17/14-16

21- यथाहि मे परावस्थात्मनः पृथग्वस्थानं वर्णितं रावणस्य अपि आत्मा शरीरात् पृथगेव तिष्ठतीति हनुना श्रीरामस्तं हन्तुं न पारयति। तस्य चात्मा गो पुत्रनामकस्य तद्धरीरात्मके मृषे गोपितृ पञ्जरस्थस्तिष्ठतीति विभीषणेन सूचितम्।-

स्थापितो ऽस्तिखलु पञ्जरे आत्मा
रावणस्य दनुजप्रवरस्य।
पञ्जरं वसति चास्य हृदये गो -
पुत्रसंज्ञक मृषेर्निलये मे॥
रामा० 17/ 6

एतादृशं मायामयं वृत्तं भाई देशीयरामायणे एव प्रवृत्तम्। अन्यच्च श्रीहनुमता रावणात्मानं हन्तुम् यच्छलमाश्रितं तदपि भारतीयरामकथानिबद्ध हनुमच्चरित्रास्य विकेक्षम्। स हि लंका प्रवेशादौ निमृतं रूपपरिवर्तनादिकन्तु स्वीकरोति किन्तु वीरे चित्तचरित्र विपरीतमसत्य मार्गं नाङ्गीकरोति। न च कस्यामप्यवस्थायां श्रीरामस्य निन्दनं शृणोति वा। प्रायः पराक्रमेणैव साध्यं साधयति। इदमन्यथैव चिन्तितो हनुमान्— गो पुत्रमृषेरयुक्तं प्राप्य तमुवाच-

प्राप्यचैनदथमाह मृषिंतं
मान्यतेऽस्मिन् शरणं प्रतिपन्नः।
रामनामक जनं परित्यज्य
जीवितोऽपि फलमस्त्यृषिवर्य॥

तेन मान्यवर विप्रकृतोऽस्मि
धिक्कृतोऽस्मि बहुधापकृतोऽस्मि
नक्षणं क्षणमपि प्रतिपन्न-
स्त्वां शरण्यमहमस्म्युपपन्नः॥

इत्यलीकवचनम्। तवास्य
नकुवक्षसि विचे वसतिर्मे
शेत्यतेऽस्ति सरलो मनसास्मि।
यो निजाश्रितजने नहि साधु
स्त्यागएव खलु तस्य हि साधुः॥
रामा० 17/14-16

इत्यादिना श्रीरामस्येदृशस्य स्वामिनो निन्दनं कृत्वा सहाङ्गदेन ऋषिं वञ्चयति। अविश्वस्तमात्मानमप्यख्यापयति। सरलहृदयश्चक्रविपुञ्जवोऽसौ तत एवाह—

'न विश्वसेदविश्वस्तं विश्वस्तेऽपि न विश्वसेत्।
याद्दशमापणी येदं सत्यापयति सत्कथा॥

प्रकृत्या सरलोऽत्यन्तं विश्वासं समुपेयिवान्।
गोपुत्रो वापुतनये तेनाभूदिति संहितः॥
राम० 17/62-63

सरलो गोपुत्रः कुटिलेन मारीचिना वञ्चित इत्येव विचित्रं तदयमर्थोऽनुवादेन प्रकाशितः रामकीर्ते महाकाव्यस्य सप्तदशतमे सर्गे।

22- अष्टादशे मासि सर्गे महीपाल देवासुरस्य उपाख्यान अस्ति। हते रावणे तन्मित्रं महीपालदेवासुरो मित्रमृत्युमाकर्ण्य क्रोधोत्तप्तचेताः सः तत्प्रतीकारमिच्छन् ससैन्यो लंकां करोधा यथा—

दशास्ये गते राक्षसे मृत्युलोकं
सहायैः सहस्वां निवृत्ते वरास्मै
पुरीमं सर्ववृत्तान्तविज्ञः समागा-
न्महीपालदेवः पुरीं नाम लङ्काम्॥
राम० 18/1

अयमपि वृत्तान्तः रामायणकथां नानुसरति। महीपालदेवासैन्येन लङ्कायामुपच्छायां यथा विभीषणः सीतानाहार्ष्येनात्मानं रक्षति तदपि कौतुकवर्धनमुख्यानम् लंकां शासतो विभीषणस्यामित्र्यापि परिवर्तितं तथा भूतनं किमपि स्मार्यते—

दशग्रीवपूर्वं तदा राज्यकाले
सर्वं नाम तस्यांशपश्चाद्बभूव
नृपाः स्वाभिषेकस्य काले नवीना-
मभिख्यां दधुः सैव रीतिस्तदाभूत्॥
राम० 18/7

तदानीन्तनेयं परिपाटी प्रकाशिता च द्वाराजानोऽभिषेकानन्तरं नामधेयमपि परिवर्तयन्ति स्म। अस्माद्धेतोः विभीषणोऽपि 'दशग्रीवांशः' इति सञ्ज्ञां दधार। श्रीरामः शरणागतवत्सलः, स्वाश्रितभक्तानां रक्षकः इति सर्वत्रकाव्येषु तद्गुणाः वर्ण्यमाना दृश्यन्ते। कृतज्ञतायास्तु कोऽपि न तत्समः इति त्वादिकविनोदघोषितम्—

कथञ्चिदुपकारेण कृतेनैकेन तुष्यति।
न स्मरत्यपकाराणां शतमप्यात्मवत्तया॥

इति। विभीषणो लङ्कां युद्धे श्रीरामस्य साहाय्यं कृतवानिति कृतशो रामो लङ्कां विजित्य यौद्धयां संनिवृत्तुः विभीषणं सदैव रक्षितुकामस्तमुवाच—

अहः सप्तकं सप्तकेऽह्नि प्रमृत्य-
तितीर्षुं प्रहेतास्मयहं बाणमेकम्।
यदि त्वं मवेद्यापदा ग्रस्त आशु
तदालिङ्गनेनैन सम्प्रेषयस्व

रामा 18/12 कं.

अनेन खलु रामकीर्ति महाकाव्ये श्रीरामस्य शरणागतरक्षत्व मसाधारणमेव प्रकाशितं। तदाज्ञानुसारमेव विभीषणो महीपालदेवासुरकृतं लङ्कापरोधं पत्रं विलिख्य बाणे संयोजयामास। तेन तत्कृत्यं विज्ञाय श्रीरामः स्वानन्यपूर्वकं सम्प्रेष्यहनूमन्तं, तेनैव तन्मातताय्यिनं घातयित्वा विभीषणं रक्षेति सुमधुराक्षरान्पत्र मुलसोऽत्र महाकाव्ये प्राप्यते।"

एवं समुद्धृतः पूर्वं रामवाक्याद् विभीषणः।
सङ्कटाद् भीषणात्सद्य उद्धृतोऽभूच्च हनूमता।

इति। रामा. 18/34

23— लंकोपरोधक्रमे (चक्रवर्ती महीपालदेवासुरे हनूमता परेतपुरीं प्रापिते ऽन्योऽपि ~~माल[illegible]~~ नामा रावणमित्रं चमूभिर्वृतो लङ्कां। सम्प्रतस्थे।

अस्मिन् प्रसङ्गेऽद्भुतपूर्वं कथा प्रकाशिता—

रावणमृत्युकाले तत्पत्नी मन्दोदरी सगर्भासीदिति साकाक्षेण वैजासुरवंश्यमानमेकन्तनूजमसोढ। क्रमेणप्राप्तयौवनमेनं कश्चिदेको वरणीसुरनामा सैवकः पर्यचरत्। स्वसेवावसरे-ऽवसौ दुष्टिलचित्तवृत्तयो नित्यमेव विभीषणदुष्कृतंबोधयतिस्म। यदनेनैव वंशविदूषकेण रिपूणां पक्षंसमुपाश्रितेन रावणच्छिद्राणि प्रकाशयता दशकन्धरो घातितः। स्वजनैकृतमन्यायं निशम्य वैजासुरस्तत्प्रतीकारे चेतो विधयमकरोत् —

जातोऽपि वंशे बत! रक्षसां मे
पितृव्य पार्श्वे रिपुपक्षपाती।
अघातयत्तं प्रबलप्रतापं
स्वानां विरोधः किमु नैव कुर्यात्॥

पश्चिमपुरो दशकन्धरस्य —
न्यायो मयासो परिमार्जनीयः।
सएव पुत्रो महितः पृथिव्यां
यश्शास्तितातार्हितकारिलोकम।

राम० १९/६-७

इति चिंतयन्नेवासौ स्वपितृमित्रं क्षीरचक्रवर्तीतिसंज्ञं मालिवन्नरेशं गत्वातं 'मम पितुर्मृत्यौ विभीषण एव हेतुः' इति बोधयित्वा लङ्कामभिवेष्टयितुमुत्प्रेरयामास। सोऽपि दशास्यपुत्रेण सहैव ससैन्यो लङ्कां प्रति प्रतस्थे।

अस्मिन् प्रसङ्गे पुनरपि हनूमतो भूमिकाऽपि गोचरी भवति। हनूमतश्चरित्रंतु रामायणेसर्वत्रैव प्राचुर्येवर्ण्यते किन्तु रामकीर्तिये महाकाव्ये हनुमत्पुत्रयोरपि सर्वथाऽहेयं चरित्रं लक्ष्यते। अत्राहि नातिमहत्वमाजामपि पाताळाञ्चरित्रं रुचिपूर्णमङ्कितमेव वर्णितम्। हनुमतः विभीषणपुत्र्यां बेञ्जकट्यामेकोऽसुरकदनामा पुत्रसीत् द्वितीयश्च रावणतनयायां सुवर्णमत्स्यायां मच्छानुरिति पूर्वमेव वर्णितम्। तयोस्तु मच्छानोश्चरित्रं मैरावणो पाख्यान प्रसङ्गेन तयोर्दृशातमे सर्गे विस्तरेण प्रकाशितम् अथंपुनरपरोऽसुरकदनामा न क्वचिद् लब्धावकाशः इति तत्कथानकं प्रकाशयितुमिव मालिवन्नरेशोपाख्यानमुपक्रमितम्। क्रान्तम्।

श्रीरामकथायां रामचरितेनैव सदैव हनुमच्चरित्रं सर्वत्रैवसन्नियोगशिष्टमिवानुस्यूतमित्यत्रापि कमलिवन्नरेण पाठ्यमाने श्रीहनुमत एव विशेषतैशिष्ट्यं व्यतिषक्तम्। तथाहि-
मलिवन्नृपेण लङ्कानिरोधे कृते, वैरञ्जकट्यां जातोऽसुरप्रदनामा प्रामञ्जनिर्यस्तदानीं विगीषणान्निकषान्यवात्सीत्, स एतत् दुर्वृत्तं स्वजनकं श्रोतुमैच्छत्। तदानीं माकृतिः क्वचित्सैले तपोऽनुतिष्ठतीति, तमन्वेषणकाम्यया सौ शैलाटवीं ववाम। तस्यतपसः कारणमपि विनोदजनकमेव. तद्यथा-

वने भ्रमन्नेकदिने हनूमान्
रसालवृक्षे सरसैरसालैः।
कस्मिंश्चिदाकृष्यत तानि भोक्तुं
प्रवृत्तिमांश्चैव बभूव सद्यः॥
पृथक्कृतानां निजवृन्तजातात्
वृक्षेण सम्प्रस्रवता सुरेभ्यः।
संलिप्तसर्वावयवो बभूव
कपिः सुधाराश्रितधौतवर्णः॥

रामा. 19/19-20

सहसमं श्वेतिमानं यदा द्रष्टुं कराभ्यां प्रमार्ष्टुं प्रवृत्ताः समभूत तदास्य भार्याजनाः परिहासमकुर्वन्। ततश्च-

सव्रीडितस्तेन बभूव भूयः
कृतावमानो वनिताजनेन।
सम्मार्ष्टुमेतामवमाननां च
तप्तुं तपो बुद्धिमधात्स्वकीयाम्॥

रामा. 19/22

इत्येव हनुमतस्तपसः कारणम् रामकीर्तिमहाकाव्ये अभिव्यक्तम्। ततोऽसौ कपिकुञ्जरः तपःप्रकारं प्रष्टुं दिव्यकैवल्यनामानं ऋषिं समुपेतवान्। स च ऋषिः 'कपिश्चञ्चलप्रकृतिः कथं तपस्तप्तुमलं स्यादि'ति कपेस्तस्य मनुष्यीकरणाद्धेतोऽन्यमुपायमजानन् मनुष्यरूपममुष्मै प्रददौ। तदनु स क्वचित् शैलपृष्ठे तपस्यन्नसौ स्वपुत्रेणासुरप्रदावालोक्यत। किन्तु मनुजरूपत्वादयं हनुमानिति नासावमुमभिज्ञातवान्। दृष्ट्वांश्चामुमेव हनुमद्विषये-

પપ્રચ્છ ચૈનં મનુ મદ્ર દૃષ્ટ-
ત્વયા ચરન્ કાપિ તપો હનૂમાન્ ?।
સૌમ્યાદ્ય મે વાસ્મિ સ ઇત્યુવાચ
કિમર્થ મન્વિષ્યસિ તં ત્વમદ્ય ?॥
રામ૦ ૧૯/૨૬

અદસીયં વચ: શ્રુત્વા નાસુરકદ્ પ્રત્યયં જગામ। 'માનુષોઽપિ ભૂત્વા સ્વાત્માનમતુલિતબલપરાક્રમં મારુતિં ક્ષપયસી'તિ નિરમત્સર્યચચ્ચ। તતો યથાવૃત્તં વર્ણયિત્વાઽઞ્જનેય: સ્વરૂપમાપન્નો નૈજં પરાક્રમં પ્રાદર્શયત્-

તપ્તું તપો માનુષરૂપચારી જાતોઽહમદ્યેતિ ગૃહાણ પુત્ર!
નો પ્રત્યયશ્ચેદ્ વચને મદીયે તત્તિષ્ઠતે પ્રત્યયમાદધામિ॥

ઉક્ત્વા સ ઇતન્નિજમૂલરૂપં પ્રપેદિવાંશ્ચાપિ નિમીર્ણવાંશ્ચ।
નક્ષત્રતારાશશિનં સમેતાન્ પુત્રેણ સાશ્ચર્યમવેક્ષ્યમાણ:॥
રામ૦ ૧૯/૩૧-૩૨

ઇતિ પ્રત્યયે જાતે પિતાપુત્રયોર્મીલનપૂર્વં સમ્મેલનમન્ત્રોપવર્ણિતમ્। તદ્યથા-

અતર્કિતં રત્નમિવાસ્તિપુત્રરત્નંમયાલબ્ધમિહાદ્રિપૃષ્ઠે।
સદ્ય:ફલં મેતપ ઇત્યનેન હર્ષપ્રકર્ષો હૃદિમે ન માતિ॥

વચોઽતિ હૃષ્ટોઽસુરકદ્ બભાષે
શ્રુત્વાવચસ્તજ્જનકસ્ય હન્ત!।
તૃપ્તં ચિરાદ્યાદ્યમદીયનેત્ર-
યુગં સમાલોકયતસ્સ્વતાતમ્॥
રામ૦ ૧૯/૩૬-૩૭

તદનુ સોઽસુરકદ્ લઙ્કીયં વૃત્તમમુષ્મૈ નિવેદયામાસ। તન્નિશમ્ય કપિપ્રવીરો નિતાન્તાન્તાન્તરઙ્ગોબભૂવ વિભીષણરક્ષણં તપસોઽપિ જ્યાય ઇતિ તપો વિહાય શ્રુતેન ખિદ્યન્ પુરીં પ્રતિ પ્રાચલત્। (થાઇરામાયણે કિષ્કિન્ધાપુર્યેવ ખિદ્યન્ નામાભિહિતો)

તત્રત્યં સૈન્યં સંકલાય્ય પુરીમયોદ્ધ્યાઞ્જ્ઞાત:।

પપ્રચ્છ ચૈનં બહુમદ્રદૃષ્ટ-
ત્વયા ચરન્ કાપિ તપો હનૂમાન્ ?।
સૌમ્યાહમેવાસ્મિ સ ઇત્યુવાચ
કિમર્થમન્વિષ્યસિ તં ત્વમત્ર ?॥
રામ૦ ૧૯/૨૬

અદર્શીયં વચ: શ્રુત્વા નાસુરઃ પ્રત્યયઞ્જગામ। 'માનુષોઽપિ ભૂત્વા સ્વાત્માનમતુલિતબલપરાક્રમં મારુતિં ક્ષપયસી'તિ નિરમર્ત્સયચ્ચ। તતો યથાવૃત્તં વર્ણયિત્વાઞ્જનેય: સ્વરૂપમાપન્નો નેજં પરાક્રમં પ્રાદર્શયત્ -

તપ્તુંતપો માનુષરૂપચારી જાતોઽહમધેતિગૃહાણપુત્રી!
નો પ્રત્યયશ્ચેદ્ વચને મદીયે તત્તિષ્ઠતે પ્રત્યયમાદધામિ॥

ઉક્ત્વા સ ઇતન્નિજમૂલરૂપં પ્રપેદિવાંશ્ચાપિનિમીર્ણવાંશ્ચ।
નક્ષત્રતારાશશિનં સમેતાન્ પુત્રેણ સાશ્ચર્યમવેક્ષ્યમાણા:॥
રામ૦ ૧૯/૩૧-૩૨

ઇતિ પ્રત્યયે જાતે પિતાપુત્ર્યોર્ભાવપૂર્ણં સમ્મેલનમત્રોપવર્ણિતવ્યં। તદ્યથા-

અતર્કિતં રત્નમિવાસ્તિપુત્રરત્નંમયાલબ્ધમિહાદ્રિધૂઙ્ગે।
સદ્ય:ફલં મેતપ ઇત્યનેન હર્ષપ્રકર્ષો હૃદિમે ન માતિ॥

વચોઽતિ હૃષ્ટોઽસુરકદ્ બભાષે
શ્રુત્વાવચસ્તજ્જનકસ્ય હન્ત!।
તૃપ્તં ચિરાયાધ્યમદીયનેત્ર-
યુગં સમાલોકયતસ્સ્વતાતમ્॥
રામ૦ ૧૯/૩૬-૩૭

તદનુ સોઽસુરકદ્ લઙ્કીયંવૃત્તમમુષ્મૈ નિવેદયામાસ। તન્નિશમ્ય કપિપ્રવીરો નિતાન્તાન્તાન્તરઙ્ગોબભૂવ વિભીષણરક્ષાંતપસોઽપિ જ્યાય ઇતિ
તપો વિહાય સ્વતેન ખિદ્યન્ પુરીં પ્રતિ પ્રાચલત્।
(થાઇરામાયણે કિષ્કિન્ધાપુર્યૈવ ખિદ્યન્ નામાભિહિતો)

તત્રત્યં સૈન્યં સંકલય્ય પુરીમયોદ્ધ્યાઞ્જ્ઞાત:।

ततः समेतो भरतेन चापि शत्रुघ्न नाम्ना च रघूद्वहेन ।
लङ्कापुरी मोचन बद्धबुद्धिरकालहीनं प्रतितां प्रतस्थे ॥
रामा० १७/५२

पारे समुद्रं लङ्का स्थितेति सेतुमन्तरा कथङ्कारन्तत्र सैन्यं गच्छेत् । "लङ्कापुरी विजयार्थेतादावश्यकं वस्तु श्रीरामेण पुराकृतः सेतुस्तु रावणजयेसति रघूद्वहेनैव निरस्तः समुद्रमर्यादां लक्ष्यीकृत्य । एतत्कार्यं सम्पादनाय कपिवृषभेण बलसागरेण मारुतिना महदद्भुतोऽश्रुतपूर्वः पराक्रमः प्रादर्शि । तच्च विदुषामपि चेतश्चमत्कारकारि, किन्तत् -

दीर्घीकृतो नीलकलेवरोऽत्र
चकारवारांनिधि सेतुकार्यम् ।
सैन्यानिचेनप्रययुः सुखेन
पारे समुद्रं प्रयतानि तानि ॥
१७/५३

ततश्च युद्धे वैणासुरवंश नामानं दनुजं परेतपुरीपथगामिनं विधाय भरतसैन्यं मलिवन्नृपपुरं प्रति गतम् तत्रापि तस्य त्रीनपि सुतान् हत्वा तत्सहायं वेतालमपि घातयामास ।

अन्तेच वीरो भरतो जघान
स्वकावजातान्तमिवप्रसन्नः ।
प्रचण्डयोधं मलिवन्नरेशं
ब्रह्मास्त्रयोगेन विदां वरेण्यः ॥
रामा० १७-५०

हनुमतः सुवर्णमट्यां मच्छानुसंज्ञः पुत्रा ~~कपि~~ आसीदिति पूर्वं वर्णितम् । श्रीभरतेन स्वमलिवद्राज्येऽभिषिक्तः । तदेतन्नूतनं प्रसिद्धकथाविलक्षणं कथानकमेकोनविंशतितमे ~~सर्ग~~ सर्गे निबद्धम् -

स्थानेऽभिषञ्चदथतस्यहनूमतोऽयं
मच्छानुसंज्ञकमपत्यवरं प्रतापी
रामानुजो भरत, आहृतं प्रवीरं
चर्मण्वतीपथिनयन्विन्मलिवत्प्रदेशम् ॥

पुत्री प्रियाचं नृपतेश्च चक्रवर्ती-
त्याख्यस्य रत्नमिव सम्प्रति रत्नमाली।
पत्नी तवाग्र महिषी भवतु प्रबुद्धा
सिंहासनं सह तया परिभूषयस्व॥
रामo १४/५१-५२

इति भरतकृपयामच्छ्रद्धानुबंहितस्वभागधेय।

२५- विंशतितमः सर्गोऽपि कथानक दृष्ट्याऽतीव महत्त्वं बिभर्ति। अस्मिन् सर्गे सीता त्याग कथा कथिता। न च सापि पूर्वभारतीय-कथाः समनुसरति। भारतीयेषु रामायणेषु रामकथासु वा प्रायशः सर्वत्रायमेव सीता परित्याग प्रकारः प्रस्फुटति यद् जनापवाद-भीतेन श्रीरामेण सीतायां गृशं स्निह्यतापि, कृतमिदमकार्यम् 'रावणगृहोषिता जानकी सदोषेति न गृहीतव्या रामेणे'ति लोका-पवादस्तस्य कर्णशष्कुल्यौ ~~निर्दहति~~ तीव्रं मोदमशक्नुवानो रामः 'सीता वने विसर्जनीया सगर्भापि त्वयेति' लक्ष्मणमादिदेश। न तस्यां रामस्य स्वात्मनो दोषदृष्टिः, सीता सर्वथा दोषशून्येति तस्य दृढीयान् विचारः। केवलं लोकापवाद परिमार्जनायतेन लोकानुरञ्जनापवानवद्याद्धा सीता परित्यक्ता। यथा रामायणानुसारिणि रामकीर्तिमहाकाव्येत्वितो विपरीतमेव-कथातत्वं पुरतः समायाति। शिखरिणीच्छन्दसा समुपक्रान्ते सर्गेऽस्मिन्, यावत् पाठकः किञ्चित् मोदमावहति, तावच्चतुर्दशवर्षाणि वनेऽनिर्वचनीयानि दुःखानि भुक्तवत्याः सीतायाः ऋषीदया निवाससुखवर्णनेन-

वनेषु गाढत्वापि प्रथममतिकष्टेषु गहने-
ऽवयोद्दयायां सम्प्रत्यति महित पुर्यामधिगता।
पदं सीताराज्ञ्या इह जगति वीता खिलमया
विनिन्ये सुप्रीता समयमिय मत्यन्त सुखिता॥
रामo २०/५

ममान्तः कक्षामुपगत इदानीमयशसां
मयातीर्णो भीमो जलनिधिरिदानीञ्च मयदः
अहो मे सौभाग्यं रघुकुलमणिर्मे पतिरिह
मदीयेगर्भेऽस्थो विलसति तदीयाङ्कुर इति॥
रामo २०/6



इत्यादिना तावत्

प्रमोदाढ्यौ यावत्तरति सरलैषाभ्रुपवधूः
स्वकीये सौभाग्येऽनुभवति च गर्वैधमतुलम् ।
तदैवास्यां वाट्यामभिरिव मयोद्वेगजनिकृत्
अतीवोग्रो वज्रो हत विधिविलासान्निपतितः ॥

रामा० २०/7

इति शब्दसौष्ठवमधुरिमानं विभ्रदपि पद्यं चेतसि कमपि अतर्किमेवोद्वेगं जनयति । शङ्कानिष्टस्य चोपलेपयति हृदङ्गणम् । भिन्नेव भवति मनोवृत्तिः । भाविदुःख कषायदूषितेव भवति मनः । चिन्तासैथिल्यमिवोपगच्छन्तीन्द्रियाणि । निरस्मिव प्रतीयतेऽखिलमजगत् । ज्ञेतॄणां पाठकानाम्च । यद्यपि रामायणकथासंस्कृतं चेतः सीता निर्वासन भूमिकामधिरोहति तथापि तद्धेतुविषयेऽनभिज्ञमेव सर्वथा वर्तते ।

अनुपदमेव पद्यमेवं पठित्वा —

अरूच्छूर्पेत्येवं प्रथमपदमुक्तं नखपदं
दधाना रक्षःस्त्री विकृतकृतरूपा शठतया ।
सुनिद्राभङ्गेन प्रकुपिततरा येन भवनं
जगामासौ भ्रातुर्दशवदन संशय्य वदती ॥

रामा० २०/9

पाठकः किमपि उत्कण्ठासाधारणं कौतुकं बिभर्ति । साम्प्रतं कुतः पुनरपि कथायां शूर्पणखा समाविशेति । नाद्यापि ज्ञातं सीतानिर्वासनहेतुत्वेन शूर्पणखाकथां निर्धारयितुं पारयति । किन्तु यथा-यथा पुरतः सरति नेत्रवृत्तिः सर्गपद्येषु तथा-तथा सर्वं प्राकट्यमुपयाति तादृशम् —

(पृष्ठपरिवर्तनीयम्)





इत्यादिना तावत्

प्रमोदाढ्ये यावत्तरति सरलैषाम्नृपवधूः
स्वकीये सौभाग्येऽनुभवति च गर्वैधमतुलम् ।
तदैवास्यां वाट्यामृमिरिव मयोद्वेगजनिकृत्
कृतीवोग्रो वज्रो हत विधिविलासान्निपतितः ॥

रामा० २०/१

इति शब्दसौष्ठवमधुरिमानं विभ्रदपि पद्यं चेतसि कमपि कर्तव्यमेवोद्वेगं जनयति । शङ्कानिष्टस्य चोपलेपयति हृदङ्गणम् । भिन्नेव भवति मनोवृत्तिः । भाविदुःख कषायदूषितमिव भवति मनः । चिन्तास्थैर्यमिवोपगच्छन्तीन्द्रियाणि । निरस्तमिव प्रतीयतेऽखिलमजगत् श्रोतॄणां पाठकानाम्च । यद्यपि रामायणकथासंस्कृतं चेतः सीतानिर्वासनभूमिकामधिरोहति तथापि तद्धेतुविषयेऽनभिज्ञमेव सर्वथा वर्तते । अनुपदमेव पद्यमेवं पठित्वा —

अरुच्छद्मैत्येवं प्रथमपदमुक्तं नरवपदं
दधाना रक्षःस्त्री विकृतकृतरूपा शठतया ।
सुमित्रापुत्रेण प्रकुपिततरा येन भवनं
जगामासौ मातुर्दिशवदन संरभ्य रुदती ॥

रामा० २०/१

पाठकः किमपि उत्कण्ठासाधारणं कौतुकं बिभर्ति । साम्प्रतं कुतः पुनरपि कथायां शूर्पणखा समाविष्टेति । नाद्यापि सीतानिर्वासनहेतुत्वेन शूर्पणखाकथां निर्धारयितुं पारयति । किन्तु यथा-यथा पुरतः सरतो मे गतिः सर्गपदेषु तथा-तथा सर्वं प्राकट्यमुपयातीति दिक्यम् —

(द्वितीयपरिच्छेदस्यान्ते)



Nirmal Seth

"तात्कालिकमभिप्रेतं फलमस्य
प्रयोजनम्।"